# प्रयोगसंग्रहः

रचयिता

डा.जि.यस्.वि.दत्तात्रेयमूर्तिः

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA
वन्दे सद्गुरुं चन्द्रशेखरम्
KANCHEEPURAM
SCSVMV

चन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

एनात्तूर्, काञ्चीपुरम्

## ।।वररुचिकारिकाः।।

## अथ कारकसंग्रहः

**प्रयोगमिच्छता ज्ञातुं ज्ञेयं कारकमादितः।**
**संज्ञया षड्विधं भेदास्त्रयोविंशतिधा पुनः।।1।।**

श्रीगुरुभ्यो नमः। इदानीमेषां वररुचिविरचितानां श्लोकानां विवरणमारभ्यते। **प्रयोगमिति-** यो यथाविहितं शब्दप्रयोगं ज्ञातुमुच्छति तेन आदितः कारकं ज्ञेयम्,शब्दाश्रयाणां ज्ञेयानां मध्ये कारकं क्रियानिमित्तं प्रथमतः ज्ञेयमित्यर्थः। तच्च कारकं संज्ञया नाम्ना षड्विधं भवति कर्तृकर्मकरणसंप्रदानापादानाधिकरणनीति।

**अत्रैष संग्रहश्लोकः-**

कर्ता कर्माथ करणं संप्रदानं तथैव च।
अपादानाधिकरणे कारकाणि षडेव हि।।

तद्भेदाः पुनस्त्रयोविंशतिधा भवन्ति। कथम् ?

**तत्र पञ्चविधः कर्ता कर्म सप्तविधं भवेत्।**
**करणं द्विविधं चैव संप्रदानं त्रिधा मतम्।।2।।**
**अपादानं द्विधा चैव तथाधारश्चतुर्विधः।**
**करोति कारकं सर्वं तत्स्वातन्त्र्यविवक्षया।।3।।**

**तत्रेति-** तत्र तस्मिन् कारकषट्के पञ्चविधः कर्ता, सप्तविधं कर्म, द्विविधं करणम्, त्रविधं संप्रदानम्, द्विविधमपादानम्, चतुर्विधमधिकरणं चेति कारकभेदास्त्रयोविंशतिधा भवन्ति। तत्र **पञ्चविधः कर्ता**[1]- 1.स्वतन्त्रकर्ता, 2.हेतुकर्ता, 3.कर्मकर्ता, 4.अभिहितकर्ता, 5.अनभिहितकर्ता चेति। तत्राद्यः स्वतन्त्रकर्ता यथा- पुण्यं करोति देवदत्तः, मैत्रीं भजन्ते सन्तः। अत्र **स्वतन्त्रः कर्ता**[2] इति कर्तृसंज्ञा। स्वातन्त्र्यं यत् कारकं तत् कर्तृसंज्ञं भवति। **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा**[3] इति प्रथमा। हेतुकर्ता यथा- हितं लभ्यन्ति विनीतान् धीराः। **तत्प्रयोजको हेतुश्च**[4] इति सूत्रेण हेतुकर्ता। कर्मकर्ता यथा- स्वयमेव बुध्यन्ते कुशलबुद्धयः, स्वयमेव दृश्यन्ते दुष्टजनदोषाः, स्वयमेव छिद्यन्ते प्राकृतजनस्नेहाः। **कर्मवत्कर्मणा तुल्यक्रियः**[5] इति सूत्रेण कर्मवद्भावः।

---

[1] अयं च त्रिविधः- शुद्धः, प्रयोजको हेतुः, कर्म कर्ता च। मया हरिः सेव्यते। कर्यांते हरिणा। गमयति कृष्णं गोकुलमिति क्रमशः उदाहरणानि। स्पष्टं चेदं भूषणसारे।

[2] क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यादिति सूत्रार्थः।(1-4-42)अष्टाध्यायी.

[3] नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यादिति सूत्रार्थः।(2-3-46)अष्टाध्यायी.

[4] कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यादिति सूत्रार्थः।(1-4-55)अष्टाधायायी.

[5] कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत् स्यादिति सूत्रार्थः।(3-1-89)अष्टाध्यायी.

अभिहितकर्ता यथा-साधवः परार्धमापादयन्ति। अनभिहितकर्ता यथा-साधुभिरापाद्यन्ते परार्थाः। अत्र **कर्तृकरणयोस्तृतीया**[6] इति सूत्रेण तृतीया।

**कर्मसप्तविधं**[7] यथा- 1.ईप्सितं कर्म, 2.अनीप्सितं कर्म, 3.ईप्सितानीप्सितं कर्म, 4.अकथितं कर्म, 5.कर्तृकर्म, 6.अभिहितं कर्म, 7.अनभिहितं कर्म चेति। तत्रेप्सितं कर्म यथा- ओदनं भुङ्क्ते मनुष्यः, दुर्विज्ञानमपि धर्मं विज्ञातुं

---

[6] अनभिहिते कर्तरि करणे च तृतीया स्यादिति सूत्रार्थः।(2-3-18)अष्टाध्यायी.

[7] निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम्।

तच्चेप्सिततमं कर्म चतुर्धाऽन्यत्तु कल्पितम्।

औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम्।

संज्ञान्तरेरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्। कर्तुरीप्सिततमं कर्म इति प्रथमसूत्रविहितं कर्म तु निर्वर्त्यं, विकार्यं, प्राप्यमिति त्रिधा मतम्। अन्यदपि सूत्रान्तरनिर्दिष्टमपि चतुर्धा। औदासीन्येन=ताटस्थ्येन प्राप्यम्. यच्च कर्तुरनीप्सितम्= यथा चोरविषयादि। एतद्वयमपि तथा युक्तं चानीप्सितम् इति द्वितीयसूत्रनिर्दिष्टम्।संज्ञान्तरैः=अपादानादिसंज्ञान्तरैः, अनाख्यातम्=अविवक्षितम्। एतत् अकथितञ्च इति तृतीयसूत्रनिर्दिष्टम्। अन्यपूर्वकम्= अन्यत् कारकं पूर्वं यस्य तत् =यथा देवदत्तमभिक्रुध्यति, देवदत्तादिकं क्रुधद्रुहईर्ष्यासूयार्थानां यं प्रति कोपः इत्यादि पूर्वसूत्रेण संप्रदानसंज्ञकमपि क्रुधद्रुहोपसृष्टयोः कर्म इत्यनेन कर्मसंज्ञकमेव भवति। इत्थं प्रथमसूत्रविहितं कर्म त्रिविधं, सूत्रान्तरविहितं कर्म चतुर्विधमितिकृत्वा संभूय कर्म सप्तधा भवति।स्पष्टं चेदं भूषमसारे।

श्रद्दधात्युदारधीः। **कर्तुरीप्सिततमं कर्म** इति सूत्रेण कर्मसंज्ञा। अनीप्सितं कर्म यथा- कल्याणमपि धर्मं प्रतिक्षिपन्ति पापबुद्धयः, विषं भक्षयन्ति क्षुद्राः। **तथायुक्तं चानीप्सितम्** इति सूत्रेण कर्मसंज्ञा। ईप्सितानीप्सितं कर्म यथा- पायसं भक्षयन् उपरि पतितं रजः प्रत्यभ्यवहरति कुमारः. अत्र आदृतत्वात् पायसस्य अनादृतत्वाद्रजसः ईप्सितानीप्सितत्वम्। अकथितं कर्म यथा- गां दोग्धि पयो गोपालकः, यज्ञदत्तं याचते कम्बलं ब्राह्मणः। **अकथितञ्च** इति सूत्रेण कर्मसंज्ञा। कर्तृकर्म यथा- गच्छति शिष्यो ग्रमम्, गमयति शिष्यं ग्रामं गुरुः। **गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ**[8] इति कर्मसंज्ञा। अभिहितं कर्म यथा- कटः क्रियते देवदत्तेन। अनभिहितं कर्म यथा- कटं करोति देवदत्तः। **कर्मणि द्वितीया**[9] इति सूत्रेण द्वितीया।

**द्विविधं करणं** बाह्यमाभ्यन्तरं चेति। यत् शरीरावयवादन्यत् तद्बाह्यम्। बाह्यकरणं यथा- दात्रेण लुनाति व्रीहीन् नरः, परशुना छिनत्ति वृक्षं देवदत्तः। शरीरावयवाश्रितं यत् तदाभ्यन्तरम्। आभ्यन्तरकरणं यथा- मनसा पाटलिपुत्रं

---

[8] गत्याद्यर्थानां शब्दकर्मणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यादिति सूत्रार्थः।(1-4-52)अष्टाध्यायी.

[9] अनुक्ते कर्मणि द्वितीया स्यादिति सूत्रार्थः।(2-3-2)अष्टाध्यायी.

गच्छति देवदत्तः, चक्षुषा रूपं गृह्णाति नरः। **साधकतमं करणम्** इति सूत्रेण करणसंज्ञा। **कर्तृकरणयोस्तृतीया** इति सूत्रेण तृतीया।

**त्रिविधं संप्रदानम्**[10]- 1.प्रेरकम्, 2.अनुमन्तृ, 3.अनिराकर्तृ। तत्र प्रेरकं यथा- ब्राह्मणाय गां ददाति देवदत्तः। स हि ब्राह्मणः समासाद्य गां मह्यं देहीति प्रेरयति, तस्मात् प्रेरकमित्युच्यते। अनुमन्तृ यथा- अतिथये वृक्षमूलं ददाति तपोधनः। स ह्यतिथिः वृक्षमूलं मह्यं देहीति न तावत् प्रेरयति, दीयमानमनुमन्यते, तस्मादनुमन्त्रित्युच्यते। अनिराकर्तृ यथा- पुरुषोत्तमाय पुष्पं ददाति वैष्णवः। अत्र पुरुषोत्तमो मह्यं न देहीति न निराकरोति, तस्मादनिराकर्त्रित्युच्यते। **कर्मणा यमभिप्रैति स संप्रदानम्**[11] इति सूत्रेन संप्रदानसंज्ञा। **चतुर्थी संप्रदाने**[12] इति सूत्रेण चतुर्थी।

---

[10] अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम्।

प्रेरणानुमतिभ्यां च लभते संप्रदानताम्।।अनिराकर्तृ, प्रेरयितृ, अनुमन्तृ इति संप्रदानं त्रिविधम्। सूर्यायाघ्र्यं ददाती त्याद्यम्। नात्र सूर्यः प्रार्थयते, नानुमन्यते, न निराकरोति। प्रेरकं- विप्राय गां ददाति, अनुमन्तृ- उपाध्यायाय गां ददाति इति । स्पष्टं चेदं भूषणसारे।

[11] कर्मणा यमभिप्रैति स संप्रदानसंज्ञः स्यादिति सूत्रार्थः।(1-4-32)अष्टाध्यायी.

[12] (2-3-13)अष्टाध्यायी.



SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA KANCHEEPURAM SCSVMV

**द्विविधमपादानं**[13]- 1.चलम्, 2.अचलं चेति। चलं यथा- धावतो रथान् पतति सारथिः, परिधावतो हस्तिनः पतत्याधोरणः। अचलं यथा- ग्रामादागच्छति देवदत्तः, पर्वतादवतरन्ति महर्षयः। **ध्रुवमपायेऽपादानम्**[14] इति सूत्रेण अपादानसंज्ञा। **अपादाने पञ्चमी**[15] इति सूत्रेण पञ्चमी विभक्तिः।

**चतुर्विधमधिकरणं**[16]- 1.व्यापकम्, 2.औपश्लेषिकम्, 3.वैषयिकम्, 3.सामीपिकं चेति। तत्र व्यापकं यथा- तिलेषु तैलं व्याप्तम्। औपश्लेषिकं यथा-कटे आस्ते पुरुषः। वैषयिकं यथा- गुरौ भक्तिः प्रशस्या, काव्ये श्रमः सफलः।

---

[13] निर्दिष्टविषयं किंचिदुपात्तविषयं तथा।
अपेक्षितक्रियं चेति त्रिधाऽपादानमुच्यते।।यत्र साक्षाद्धातुना गतिर्निर्दिश्यते तन्निर्दिष्टविषयम्। यथा-अश्वात्पतति। यत्र धात्वन्तरार्थाङ्गं स्वार्थं धातुराह, तदुपात्तविषयम्। यथा-बलाहकाद्विद्योतते विद्युत्। निःसरणाङ्गे विद्योतने द्युतिर्वर्तते। अपेक्षितक्रिया यत्र तदन्त्यम्। यथा कुतो भवान्, पाटलिपुत्रात्। स्पष्टं चेदं भूषणसारे।

[14] अपायो=विश्लेषः, तस्मिन्साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यादिति सूत्रार्थः।(1-4-24)अष्टाध्यायी.

[15] (2-3-28)अष्टाध्यायी.

[16] एतच्च त्रिविधम्। औपश्लेषिकम्, वैषेयिकम्,अभिव्यापकं चेति। कटे शेते, गुरौ वसति, मोक्षे इच्छाऽस्ति, तिलेषु तैलमिति। एतच्च संहितायामिति सूत्रे भाष्ये स्पष्टम्। स्पष्टं चेदं भूषणसारे।

सामीपिकं यथा- गङ्गायां घोषः प्रतिवसति। **आधारोऽधिकरणम्**[17] इति अधिकरणसंज्ञा, **सप्तम्यधिकरणे च**[18] इति सप्तमी विभक्तिः।

यदि करोतीति कारकमित्यन्वर्थसंज्ञा, कर्हि कर्तैव कारकसंज्ञो भवति, नेतराणि कर्मकरणादीनि। अत्रोच्यते तान्यपि कारकण्येव इति। कुतः? तत्तद्व्यापारो।पि स्वतन्त्र्यविवक्षायां प्रतिकारकं हि स्वातन्त्र्यं विवक्ष्यते। अतः कर्मकरणसंप्रदानापादानाधिकरणानामपि कारकत्वं सिद्धम्।

**अत्र सोदाहरणसंग्रहश्लोकाः-**

स्वतन्त्रहेतुकर्माभिहितानभिहितात्मकः।
कर्ता पञ्चविधः प्रोक्तस्तस्योदाहरणं क्रमात्।
पुण्यं करोति सुकृती बुधं लम्भयते हितम्।
पच्यते पाचकेनान्नमित्युदाहरणं भवेत्।
कर्तृकर्मानभिहिताभिहितकथितानि च।
ईप्सितानीप्सिततममनीप्सिततमं तथा।
स्यादीप्सिततमं चेति कर्म सप्तविधं यथा।

---

[17] कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञः स्यादि सूत्रार्थः।(1-4-45)अष्टाध्यायी.

[18] अधिकरणे सप्तमी स्यादिति सूत्रार्थः।(2-3-36)अष्टाध्यायी.

शिष्यं गमयति ग्राममाचार्यः कर्मकारणात्।

कटं करोति पुरुषः पुंसा च क्रियते घटः।

गां पयो दोग्धि गोपालो ग्रामं गच्छंस्तृणं स्पृशेत्।

विषं भक्षयति क्षुद्रो भुङ्क्ते मृष्टान्नमर्भकः।

बाह्यमाभ्यन्तरं चेति करणं द्विविधं स्मृतम्।

वेदाङ्गादितरद्बाह्यमन्यद्देहाङ्गसंश्रयम्।

व्रीहीन् लुनाति दात्रेण रूपं गृह्णाति चक्षुषा।

संप्रदानं त्रिधा प्रोक्तं प्रेरकं चानुमन्तृ च।

अनिराकर्तृ च यथा ब्राह्मणाय ददाति गाम्।

तपस्विने वृक्षमूलं दत्ते माल्यानि विष्णवे।

अपादानं द्विधा प्रोक्तं चलं चाचलमेव च।

धावतोऽश्वान्निपतति नरोऽवतरति द्रुमात्।

सामीपिको वैषयिको व्याप्तौपश्लेषिकौ तथा।

आधारस्तु चतुर्धा स्यात् तदुदाहरणं यथा।

नद्यां घोषः श्रमः काव्ये तिले तैलं कटे स्थितः।

षष्ठी शेषे पुमान् राज्ञ इत्यादिषु विधीयते।।

**तत्र कर्तर्यभिहिते प्रथमैव विधीयते।**

**तृतीया वाथवा षष्ठी स्मृतानाभिहिते द्विधा।।4।।**

**तथा कर्मण्यभिहिते विभक्तिं विद्धि पूर्विकाम्।**

**अनुक्ते प्रथमां हित्वा पञ्चमीं सप्तमीं यथा।।5।।**

**तत्रेति**। तत्र कर्तृकर्मकरणसंप्रदानापादानाधिकरणेषु मध्ये अभिहिते कर्तरि प्रथमैव भवति। यथा-पचत्योदनं देवदत्तः। अनभिहिते कर्तरि द्वि विभक्ती भवतः, तृतीया वा षष्ठी वा। तत्र तृतीया यथा- ओदनं(ओदनः) देवदत्तेन, **कर्तृकरणयोस्तृतीया** इति सूत्रेण तृतीया। षष्ठी यथा- परलोकहितस्य सेवितव्यो धर्मः, परलोकहितेन वा, **कृत्यानां कर्तरि वा**[19] इति षष्ठी। **तथेति**। यथा अभिहिति कर्तरि प्रथमा, तथा कर्मण्यभिहिते प्रथमैव भवति, यथा- ओदनः पच्यते देवदत्तेन, आहारो दीयते देवगुप्तेन। अनुक्ते कर्मणि प्रथमां पञ्चमीं सप्तमीं वर्जयित्वा शेषाश्चत्वारो विभक्तयो भवन्ति। काः शेषाः? द्वितीया तृतीया चतुर्थी षष्ठी चेति। द्वितीया यथा-ग्रामं गच्छति पुरुषः, **कर्मणि द्वितीया** इति सूत्रेण द्वितीया। तृतीया यथा- पुत्रेण सञ्जानीते पिता- पुत्रं सञ्जानीते इत्यर्थः। **संज्ञोन्यतरस्यां कर्मणि**[20] इति सूत्रेण तृतीया। चतुर्थी यथा- ग्रामाय व्रजति पुरुषः- ग्रामं व्रजतीत्यर्थः।

---

[19] षष्ठी वा स्यादिति सूत्रार्थः।(2-3-71)अष्टाध्यायी.

[20] संपूर्वस्य जानातेः कर्मणि तृतीया वा स्यादिति सूत्रार्थः।(2-3-32)अष्टाध्यायी.

**गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि**[21] इति चतुर्थी। षष्ठी यथा-कटस्य कारको देवदत्तः, **कर्तृकर्मणोः कृति**[22] इति षष्ठी।

**अत्र श्लोकोदाहरणानि-**

हरिं भेजे पुमान् पुंसा पुंसो वन्द्योऽथवा हरिः।

ओदनं पच्यते सूदैः पुरं गच्छति पार्थिवः।

कर्ता ग्रामस्य पुरुषः पुमान् ग्रामाय गच्छति।

सञ्ज्ञानीते कुमारेण पितेत्येवसुदाहृतिः।

**तृतीया पञ्चमी चैव षष्ठी च करणे त्रिधा।**

**षष्ठी चतुर्थी तृतीया संप्रदाने तथ त्रिधा।।6।।**

**पञ्चमी खल्वपादाने वर्तते न ततो।न्यथा।**

**सप्तम्येवाधिकरणे कारकस्यैष सङ्ग्रहः।।7।।**

तृतीयेति। करणे तृतीया यथा-परशुना वृक्षं छिनत्ति देवदत्तः, **कर्तृकरणयोस्तृतीया** इति सूत्रेण तृतीया। करणे पञ्चमी यथा- स्तोकान्मुक्तः- स्तोकेनमुक्तः इत्यर्थः, **करणे च स्तोकाल्पकृच्छ्रकतिपयासत्ववचनस्य** इति सूत्रेण

---

21 अध्वभिन्ने गत्यर्थानां कर्मण्येते स्तश्चेष्टायामिति सूत्रार्थः।(2-3-12)अष्टाध्यायी.

22 कृद्योगे कर्तरि कर्मणि च षष्ठी स्यादिति सूत्रार्थः।(2-3-65)अष्टाध्यायी.

पञ्चमी। तस्मिन्नेव षष्ठी यथा- घृतस्य सञ्जानीते मित्रम्- घृतेन मित्रं प्रक्षते इत्यर्थः। **ज्ञोऽविदर्थस्य करणे** इति षष्ठी।

संप्रदाने षष्ठी यथा- पुरुषमृगश्चन्द्रमसो दातव्यः, चन्द्रमसे दातव्य इत्यर्थः। **चतुर्थ्यर्थे बहुलं छन्दसि** इति संप्रदाने चतुर्थी। तस्मिन्नेव चतुर्थी यथा- क्षुदितायौदनं ददाति देवदत्तः। **चतुर्थी संप्रदाने** इति चतुर्थी। तत्र तृतीया यथा- दास्या माल्यं संप्रयच्छते युवा-दास्यै मालां ददाति। **दाणश्च सा चेच्चतुर्थ्यर्थे** इति वार्तिकेन तृतीया।उभयमनेन संभाव्यते तृतीयाविभक्तिरात्मनेपदविधानं च। यदयं योगस्तृतीयायुक्ताद्दाणो **दाणश्च सा चेच्चतुर्थ्यर्थे** इति, आत्मनेपदमनुशास्ति, अशिष्टव्यवहारे तृतीया चतुर्थ्यर्थे भवति। अशिष्टव्यवहारो धूर्तव्यवहारः।

**पञ्चमीति**। अपादाने पञ्चम्येव वर्तते, यथा-पर्वतादवतरन्ति महर्षयः। **अपादाने पञ्चमी** इति पञ्चमी। अधिकरणे सप्तम्येवेति सप्तमी यथा-ग्रामे वसति नरः। **सप्तम्यधिकरणे च** इति सप्तमी। कारकस्यैष संग्रहः इति दिङ्मात्रं प्रदर्शितं कारकसङ्ग्रहे, विस्तरेण वृत्यादिषु द्रष्टव्यम्।

**अत्र श्लोकोदाहरणानि-**

व्रीहीन् लुनाति दात्रेण स्तोकान्मुक्तो भवेन्मुनिः।

जानीते सर्पिष इति करणोदाहृतित्रयम्।

पुरुषमृगश्चन्द्रमसो दातव्यः क्षुधिताय च।

नगराद्गच्छति नरः पौरो वसति पत्तने।

।।इति कारकसंग्रहः।।

**।।अथ समाससंग्रहः।।**

**समासस्तद्धिस्तिङ्कृत् ते चत्वारोऽभिधायकाः।**

**त एवाभिसम्बन्धाद्भवन्त्यनभिधायकाः।।8।।**

एवं लक्षिते अभिहितानभिहितयोः स्वभावे , कियन्तस्तावद्वदभिधायकाः इति चेत्, ते समास इति समासादयश्चत्वारः। कस्यामवस्थायामिमे चत्वारः समासतद्धिततिङ्कृतः अभिधायका उच्यन्ते? कर्मणा कर्त्रा वा अभिसम्बन्धे अभिधायका उच्यन्ते, ताभ्यामेव कर्मकर्तृभ्यामनभिसंबन्धे त एव चत्वारः अनभिधायका उच्यन्ते।

**अत्रेदं श्लोकोदाहरणम्-**

मणिर्महाप्रभः शत्यो धार्यते धनिनाहृतः।

**षोढा समासः संक्षेपादष्टाविंशतिधा पुनः।**

**नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा।।9।।**

**षोढेति।** तत्पुरुषः, कर्मधारयः, द्विगुः, बहुव्रीहिः, द्वन्द्वः, अव्ययीभावश्चेति षट् समासा भवन्ति।त एव विस्तरेण अष्टाविंशतिधा भवन्ति। पश्चात्तद्विभागं वक्ष्यामः। पुनर्द्विविधो भवत्ययं समासः, नित्यः, अनित्यश्चेति। नित्यो यथा- प्रकर्षेण वरः  प्रवरः, कुम्भं करोतीति कुम्भकारः। नित्यसमासो।यम्। कथं समासस्य नित्यत्वे कुम्भं करोतीति वाक्यं क्रियते ? नैष दोषः, अपरशब्देनाप्यर्थः

प्रतीयते, यथा- स्त्रीमधिकृत्य कथा प्रवर्तते अधिस्त्रि इति। कुम्भकारः इत्यत्र **कर्मण्यण्** इति अण्, **उपपदमतिङ्** इति समासः। अनित्यसमासो।यथा-राज्ञः पुरुषः इति वा राजपुरुषः इति वा, ब्राह्मणस्य कम्बलः इति वा ब्राह्मणकम्बलः इति वा षष्ठीसमासस्य विभाषितत्वादनित्यत्वमुच्यते। प्रकारान्तरेण समासस्य द्विधात्वं दर्शयति लुगिति। लुक्समासो यथा- कृष्णं श्रितः कृष्णाश्रितः, **द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः** इति सूत्रेण समासः, **कृत्तद्धितसमासाश्च** इति सूत्रेण प्रातिपदिकसंज्ञा, **सुपो धातुप्रातिपदिकयोः** इति सूत्रेण सुपो लुक्। अलुक्समासो यथा-कण्ठे कालो यस्य सः कण्ठेकालः, उरसि लोमानि यस्य सः उरसिलोमा। **सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च वक्तव्यः** इति वार्तिकेन समासः, कृत्तद्धितेति प्रातिपदिकसंज्ञायां, सपो धत्विति लुकि प्राप्ते **अमूर्धमस्तकात् स्वाङ्गादकामे** इति अलुक्समासः।

**तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः।**

**सप्तधा च बहुव्रीहिर्द्विगुराभाषितो द्विधा।।10।।**

तत्राष्टधा तत्पुरुषः। प्रथमादिविभक्तिः सप्तविधस्तत्पुरुषः, नञ्तत्पुरुषश्चेति अष्टधा। तत्र प्रथमातत्पुरुषो यथा-पूर्वः कायस्य पूर्वकायः, अपरः कायस्य अपरकायः-**पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे** इति सूत्रेण समासः। अर्धं पिप्पल्याः अर्धपिप्पली, अर्धं कौशातक्याः अर्धकौशातकी-**अर्धं नपुंसकम्** इति

सूत्रेण समासः। द्वितीयं भिक्षायाः द्वितीयभिक्षा भिक्षाद्वितीयं वा, तृतीयं भिक्षायाः तृतीयभिक्षा भिक्षातृतीयं वा इत्यादौ **द्वितीयतृतीयचतुर्थतुर्याण्यण्यतरस्याम्** इति सूत्रेण समासः। प्राप्तो जीविकां प्राप्तजीविकः-**प्राप्तापन्ने च द्वितीया** इति सूत्रेण समासः। कस्मात् प्रथमातत्पुरुष उच्यते ? पूर्वपदस्य प्रथमान्तत्वात्। या विभक्तिः पूर्वपदस्य भवति तया विभक्त्या तत्पुरुषस्य विशेषितत्वात्, प्रथमापूर्वपदस्तत्पुरुषः प्रथमातत्पुरुषः इत्युच्यते।

द्वितीयातत्पुरुषो यथा- वृक्षं श्रितः वृक्षश्रितः, कान्तारमतीतः कान्तारातीतः, नरकं पतितो नरकपतितः, ग्रमं गतो ग्रामगतः, शरमत्यस्तः शरात्यस्तः, तरङ्गं प्राप्तः तरङ्गप्राप्तः, सुखम् आपन्नः सुखापन्नः-**द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः** इति समासः। वर्षं भोग्यो वर्षभोग्यः, योजनं प्रेरितो योजनप्रेरितः-**कालाध्वनोरत्यन्तसंयोगे** इति सूत्रेण द्वितीया, **अत्यन्तसंयोगे चेति** द्वितीयासमासः।

तृतीयातत्पुरुषो यथा-शङ्कुलया खण्डः शङ्कुलाखण्डः-**तृतीयातत्कृतार्थेन गुणवचनेन** इति सूत्रेण समासः, मासेन पूर्वो मासपूर्वः, वाचा निपुणो वाङ्निपुणः-**पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः** इति सूत्रेण समासः।

चतुर्थीतत्पुरुषो यथा-यूपाय दारु यूपदारु, कुण्डलया हिरण्यं कुण्डलहिरण्यम्-तादर्थ्ये चतुर्थी वाच्येति वार्तिकेन चतुर्थी, अर्थेन नित्यसमासो

सर्वलिङ्गता च वक्तव्या- इति ब्राह्मणायायं सूपः ब्राह्मणार्थः सूपः, ब्रह्मणायेयं भूः ब्राह्मणार्था भूः, ब्राह्मणायेदं पयः ब्राह्मणार्थं पयः, कुबेराय बलिः कुबेरबलिः, तस्मै हितं तद्धितम्, आत्मने सुखम् आत्मसुखम्, विष्णवे रक्षितं विष्णुरक्षितम्- चतुर्थातदर्थार्थबलिहितसुखरक्षितैः इति सत्रेण समासः।

पञ्चमीतत्पुरुषो यथा-चोरात् भयम् चोरभयम्-**पञ्चमी भयेन** इति सूत्रेण समासः। अर्थात् अपेतः अर्थापेतः, सुखात् अपोढः सुखापोढः- **अपेतापोढमुक्तपत्रस्तल्पशैः** इति सूत्रेण समासः।

षष्ठीतत्पुरुषो यथा-वृक्षस्य मूलं वृक्षमूलम्- **षष्ठी** इति सूत्रेण समासः, ब्राह्मणस्य याजको ब्राह्मणयाजकः-**याजकादिभ्यश्चेति** समासः।

सप्तमीतत्पुरुषो यथा-अक्षेषु शौण्डः अक्षशौण्डः-**सप्तमीशौण्डैः** इति सूत्रेण समासः, पाटलिपुत्रे सिद्धः पाटलिपुत्रसिद्धः-**सिद्धशुष्केति** समासः।

नञ्तत्पुरुषो यथा- न ब्राह्मणः अब्राह्मणः-**नञ्** इति सूत्रेण समासः।

**तत्पुरुषसंग्रहः**

प्रथमाद्यास्तत्पुरुषाः सप्त नञ्पूर्वकस्तथा।

अष्टौ तत्पुरुषा ज्ञेयास्तदुदाहरणं यथा।

पूर्वकायः सुतप्रातः शङ्कुलाखण्ड इत्यपि।

यूपदारु व्याघ्रभयं राजभृत्योऽक्षशौण्डकः।

अब्राह्मण इति ख्याता अष्टौ तत्पुरुषाः क्रमात्।

सप्तधा कर्मधारयः- विशेषणपूर्वपदः, विशेष्यपूर्वपदः, विशेषणोभयपदः, उपमानपूर्वपदः, उपमानोत्तरपदः, संभावनापूर्वपदः, अवधारणपूर्वपदश्चेति। तत्र विशेषणपूर्वपदो यथा- नीलं च तत् उत्पलं च नीलोत्पलम्- **विशेषणं विशेष्येण बहुलम्** इति सूत्रेण समासः। उपमानपूर्वपदो यथा-सङ्ख इव पाण्डुरः शङ्खपाण्डुरः- **उपमानानि सामान्यवचनैः** इति सूत्रेण समासः। उपमानोत्तरपदो यथा- नरो । यं सिंह इव नरसिंहः-**उपमितं व्याघ्रादिभिः सामान्याप्रयोगे** इति सूत्रेण समासः। संभावना पूर्वपदो यथा- गुणः इति बुद्धिः गुणबुद्धिः, पुत्रः इति ग्रहणं पुत्रग्रहणम्- **विशेषणं विशेष्येण बहुलम्** इति सूत्रेण समासः। अवधारणापूर्वपदो यथा- गुण एव धनं गुणधनम्-**मयूरव्यंसकादयश्च** इति समासः।

**कर्मधारयसंग्रहः**

विशेषविशेष्योपमानपूर्वदास्त्रयः।
तथावधारणासंभावनापूर्वपदावपि।
विशेषणोभयपद उपमानोत्तरस्तथा।
नीलाब्जं वैयाकरणखसूचिः शङ्खाण्डुरः।
विद्यावित्तं गुममतिः शीतोष्णं नृपकुञ्जरः।

सप्तधा बहुव्रीहिः- द्विपदः, संख्योत्तरपदः, सङ्ख्योभयपदः, सहपूर्वपदः, व्यतिपारलक्षणः, दिगन्तराळलक्षणश्चेति। तत्र द्विपदबहुव्रीहिर्यथा-आरूढो वानरो यं वृक्षं स भवति आरूढवानरो वृक्षः, निर्जितः कामो येन भगवता स निर्जितकामो भगवान्, उपनीतं भोजनं यस्मै ब्राह्मणाय स उपनीतभोजनः ब्राह्मणः, निष्क्रान्तो जनो यस्मात् पुरात् तत् निष्क्रान्तजन पुरम्, शुक्लः पटो यस्य सः शुक्लपटः, उषितो विभवो यस्मिन् सः उषितविभवः। **अनेकमन्यपदार्थे** इति समासः। बहुपदो यथा- पराक्रमेण उपार्जिताः संपदः यैस्ते पराक्रमोपार्जितसम्पदः-पूर्ववत्समासः। संख्योत्तरपदो यथा- द्वौ वा त्रयो वा द्वित्राः। उभयत्रापि सङ्ख्याव्ययेति समासः, **बहुव्रीहौ सङ्ख्येये डजबहुगणात्** इति समासान्तः। सहपूर्वपदो यथा- सह मूलेन उद्धृतः तरुः सहमूलोद्धृतः- **तेन सहेति तुल्ययोगे** इति समासः। **वोपसर्जनस्य** इति सूत्रेण सहशब्दस्य वा सभावः, अतः समूलोद्धृतः इत्यपि भवति। व्यतिहारलक्षणो यथा- केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि-**तत्र तेनेदमिति सरूपे** इति सूत्रेण समासः, अन्येषामिति दृश्यत इति दीर्घत्वम्. **इच् कर्मव्यतिहारे** इति सूत्रेण इच् समासान्तः, **यस्येति च** इति सूत्रेणाकारलोपः, **तिष्ठद्गुप्रभृतीनि च** इति सूत्रेण अव्ययीभावः, **अव्ययीभावश्च** इति अव्ययसंज्ञायाम्, **अव्ययादाप्सुपः** इति सुपो लुक्। दिगन्तराळलक्षणो यथा- दक्षिणस्याश्च पूबर्वस्याश्च दिशोर्यदन्तराळं सा

दक्षिणपूर्वा, एवमेव उत्तरपूर्वा-**दिङ्नाम्न्यन्तराले** इति समासः, **सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः** इत्यनेन पबर्वपदस्य पुंवद्भावः।

**बहुव्रीहिसंग्रहः**

द्विपदश्चानेकपदस्सङ्ख्योभयपदस्तथा।

सङ्ख्योत्तरपदश्चैव सहपूर्वपदस्तथा।

दिगन्तराळचिह्नश्च व्यतिहारैकलक्षणः।

सप्तधैवं बहुव्रीहिस्तस्योदाहरणं यथा।

आरूढो वानरो यं स वृक्ष आरूढवानरः।

पराक्रमार्जितधनो द्वित्रा उपदशास्तथा।

समूलोद्धृतवृक्षश्च दिक् च दक्षिणपूर्विका।

केशाकेशीति सप्तैते बहुव्रीहिभिदा क्रमात्।

**द्विगुराभाषितो यथा-** एकवद्भावी अनेकवद्भावी चेति। एकवद्भावी यथा- त्रीणि श्रृङ्गाणि समाहृतानि त्रिश्रृङ्गम्, एवमेव पञ्चपूली। **तद्धितार्थोत्तरपदसमाहारे च** इति समासः, **सङ्ख्यापूर्वो द्विगुः** इति द्विगुसंज्ञा, **द्विगुरेकवचनम्** इति सूत्रेण एकवद्भावः। **सनपुंसकम्** इति सूत्रेण नपुंसकत्वम्। पञ्चपूलीत्यत्र **अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते** इति स्त्रिलिङ्गतायां, **द्विगोः** इति ङीप्, त्रिश्रृङ्गमित्यत्र तु न भवति,

**पात्रादिभ्यः प्रतिषेधो वक्तव्यः** इति। अनेकवद्भावी यथा- चतस्रो दिशः चतुर्दिशः, त्रयो लोकाः त्रिलोकाः, **दिक्सङ्ख्ये संज्ञायाम्** इति समासः।

### द्विगुसंग्रहः

एकवद्भावी चानेकवद्भावीति द्विगुर्द्विधा।

पञ्चपूली दशदिश इत्युदाहरणद्वयम्।

**द्वन्द्वश्चतुर्विधो ज्ञेयो।व्ययीभावो द्विधा मताः।**

**तेषां पुनस्समासानां प्राधान्यं स्याच्चतुर्विधम्।।**11।।

**द्वन्द्वश्चतुर्विधो ज्ञेयः** इति। कथं स चतुर्विधः? समुच्चयः, अन्वाचयः, समाहारः, इतरेतरयोगश्चेति। तत्र समुच्चयान्वचययोरसामर्थ्यात्समासो नास्ति, **समर्थः पदविधिः** इत्यधिकारात्। समुच्चयो यथा- देवदत्तः पचति यज्ञदत्तश्च। अन्वाचयो यथा-भिक्षामट गां चानय। समाहारो यथा-शङ्खश्च पटहश्च शङ्खपटहम्, **द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् इति** सूत्रेण एकवद्भावः, **सनपुंसकमि** इति सूत्रेण नपंसकत्वम्। इतरेतरयोग यथा- देवदत्तश्च यज्ञदत्तश्च देवदत्तयज्ञदत्तौ- **चार्थे द्वन्द्वः** इति सूत्रेण समासः।

### द्वन्द्वसंग्रहः

समुच्चयोऽन्वाचयश्च समाहारस्तथैव च।

इतरेतरयोगश्चेत्येवं द्वन्द्वश्चतुर्विधः।

समुच्चयान्वाचययोरसमासोऽसमर्थयोः।

सूदः पचति सूदी च भिक्षामट च गां नय।

पाणिपादं देवदत्तयज्ञदत्ताविति क्रमः।

**अव्ययीभावो द्विधा मतः-** नामपूर्वपदः अव्ययपूर्वपदश्चेति। तत्र नामपूर्वपदो यथा- शाकस्य मात्रा शाकप्रति, फलस्य मात्रा फलप्रति-**सुप्रतिना मात्रार्थे** इति सूत्रेण मात्रार्थे समासः। अव्ययपूर्वपदो यथा-कुम्भस्य समीपे वर्तते इति उपकुम्भम्- अव्ययं विभक्तिसमीपसमृद्धिवृध्यर्थाभावा इति सूत्रेण समासः, **अव्ययीभावश्च** इति सूत्रेणाव्ययसंज्ञा, क्रममनतिक्रम्य वर्तते इति यथाक्रमम्- **यथा सादृश्ये** इति समासः। यावदमत्रं ब्राह्मणानामन्त्रयस्व- यावन्त्यमत्राणि सन्ति तावतो ब्राह्मणानामन्त्रयस्वेत्यर्थः- **यावदवधारणे** इति सूत्रेण समासः।

**अव्ययीभावसंग्रहः**

नामपूर्वपदश्चैवाव्ययपूर्वपदस्तथा।

द्विधा स्यादव्ययीभावः क्रमेणोदाहृतिर्यथा।

शाकस्य मात्रा शाकप्रत्युपकुम्भमिति द्वयम्।

**तेषां पुनस्समासानं प्राधान्यं स्याच्चतुर्विधमिति।** पूर्वपदार्थप्रधानः, उत्तरपदार्थप्रधानः, अन्यपदार्थप्रधानः, उभयपदार्थप्रधनश्चेति समासश्चतुर्धा।

तत्पुरुषः द्विप्रधानः- पूर्वपदार्थप्रधानः, उत्तरपदार्थप्रधानश्च इति। पूर्वपदार्थप्रधान यथा प्राप्तो जीविकां प्राप्तजीविकः पुरुषवृषभः। उत्तरपदार्थप्रधानो यथा- नीलोत्पलम्। अत्र कर्मधारयस्यापि तत्पुरुषावान्तरभेदेन ग्रहणम्। बहुव्रीहिर्द्विप्रधानः-अन्यपदार्थप्रधानः, उभयपदार्थप्रधानः इति च। तत्र आद्यो यथा- आरूढवानरो वृक्षः, चित्रगुर्देवदत्तः, द्वितीयो यथा- द्वित्राः, त्रिचतुराः। द्वन्द्वः उभयपदार्थप्रधान एव, यथा- पाणिपादम्। अव्ययीभावस्त्रिप्रधानः-पूर्वपदार्थप्रधानः, उत्तरपदार्थप्रधानः, अन्यपदार्थप्रधान इति च। तत्र पूर्वपदार्थप्रधानो यथा- उपकुम्भम्, उत्तरपदार्थप्रधानो यथा-शाकप्रति, अन्यपदार्थप्रधानो यथा- उन्मत्ता गङ्गा यस्मिन् देशे स भवति उन्मत्तगङ्गं देशः, अत्र **अन्यपदार्थे च संज्ञायाम्** इति समासः, **स्त्रियाः पपंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणी प्रियादिषु** इति सूत्रेण पुंवद्भावः।

**सर्वसमाससंग्रहः**

अष्टाविंशतिभेदास्ते समासाः समुदाहृताः।

तत्रापि नित्योऽनित्यश्च समासो भवति द्विधा।

कुम्भं करोतीति कुम्भकार इत्यादयस्तथा।

स्याद्राज्ञः पुरुषो राजपुरुषश्चेति तत् क्रमात्।

लुक्त्वालुक्त्वेन च द्वेधा सुखप्राप्तो युधिष्ठिरः।

बह्वव्रीह्यव्ययीभावाद्वन्द्वतत्पुरुषाः क्रमात्।
अन्यपूर्वोभयपरपदार्थप्रवणाः स्मृताः।।

**।।इति समासलक्षणम्।।**

## अथ तद्धितलक्षणम्

**सामान्याव्ययभावाख्यस्त्रिविधस्तद्धितो मतः।**
**पदानान्तु समर्थानां प्रथमाद्वा प्रसूयते।।12।।**

अथ प्राप्तावसरं तद्धितलक्षणमुच्यते। सामान्यवृत्तिः अव्ययसंज्ञो भववचनाश्चेति त्रिप्रकारः स च तद्धितः। पदानामिति- अनेकेषां पदानां परस्परसमर्थानां प्रथमादेव तद्धितप्रत्ययः प्रसूयते।

तत्र सामान्यवृत्तिस्तावत्- मतुप्, लच्, इलच्, शः, नः, णः, उरच्, रः, वः, वलच्, इनिः, ठन्, विनिः, युस्, ग्मिनिः, आलच्, आटच्, इनच्, आरकन्, आलुच्, चेलुः, चूलः, ऊलच्, अण्, वुन्, खञ्, अञ्, इञ्, फक्, यञ्, ढक्, ऐरक्, ढक्, आरक्, घः, खः, ण्यः, यत्, इत्, इतच्, अनङ्, चणप्, चुञ्चुप्, ईयसुन्, इष्ठन्, तरप्, तमप्, कल्पप्, देश्यः, देशीयर्, जातीयर्, द्वयसच्, दघ्नच्, मात्रच्, ठक्-इति पञ्चपञ्चाशत्प्रत्ययाः।

**तत्र मतुप् यथा-** गुणो यस्यास्ति यस्मिन् व स गुणवान्, गुणवती, गुणवत् कुलम्। **तदस्यास्त्यस्मिन्निति मतुप्** इति सूत्रेण मतुप्,

**मादुपधायाश्चमतोर्वो।यवादिभ्यः** इति सूत्रेण मस्य वः। **लच् यथा**-चूडा यस्यास्ति यस्मिन् वा अस्ति स चूडालः, **प्राणिस्थादातोलजन्यतरस्याम्** इति सूत्रेण लच्। वत्सं कामयते इति वत्सलः, अंशो।स्यास्तीति अंसलः, **वत्सांसाभ्यां कंबलः** इति सूत्रेण लच्। **इलज्यथा-** फेनो।स्यास्तीति फेनिलः, **फेनादिलच्च** इति सूत्रेण इलच्। तुन्दो।स्यास्तीति तुन्दिलः, **तुन्दादिभ्श्चेति** इलच्। **शो यथा-** लोमानि यस्य सन्ति स लोमशः, **नो यथा**-पामा यस्यास्ति स पामनः, **लोमादिपामादिपिच्छादिभ्यः शनेलचः** इति सूत्रेण । **णो यथा-** प्रज्ञा यस्यास्ति स प्राज्ञः, श्रद्धा यस्यास्ति स श्राद्धः, आर्चः, वार्त्तः, **प्रज्ञाश्रद्धार्चावृत्तिभ्यो णे** इति सूत्रेण णः। उरज्यथा-दन्ताः उन्नताः यस्य सः दन्तुरः, **दन्तउन्नत उरच्** इति सूत्रेण उरच्। **रः यथा-** मधु यस्यास्ति स मधुरः, **ऊषसुषिमुष्कमधो रः** इति सूत्रेण रः। **वो यथा-** केशो।स्यास्तीति केशवः, **केशाद्वोन्यतरस्याम्** इति सूत्रेण वः। **वप्रकरणे मणिहिरण्ययोरुपसंख्यानम्** मणिर्यस्यास्ति स मणिवः. एवं हिरण्यवः। **वलज्यथा-** रजो यस्याः अस्ति सा रजस्वला, **रजः कृष्यासुतिपरिषदो वलच्** इति सूत्रेण वलच्। **इनिर्यथा-** धनमस्यास्तीति धनी, **ठन्यथा-** धनमस्यास्तीति धनिकः-**अत इनिठनौ, ठस्येकः।** **विनर्यथा-** यशः अस्यास्तीति यशस्वी, **अस्मायामेधास्त्रजो विनिः।** **युस् यथा-** ऊर्णा यस्यास्ति स ऊर्णायुः, **ऊर्णाया युस्।** **ग्मिनिर्यथा-** वागस्यास्तीति वाग्मी, **वाचो ग्मिनिः, सौ च** इति दीर्घः। **आलच् यथा-** यो बहुसंबद्धं भाषते स

वाचालः, **आटच् यथा-** यो बह्वसंबद्धं भाषते स वाचाटः, **आलजाटचौ बहुभाषिणि ।** **इनच् यथा-**फलान्यस्य सन्ति फलिनः, बर्हाणि अस्य सन्ति बर्हिणः, **फलबर्हाभ्यामिनच्. आरकन् यथा-**श्रृङ्गं यस्यास्ति स श्रृङ्गारकः, वृन्दं यस्यास्ति व वृन्दारकः, **श्रृङ्गवृन्दारकाभ्यामारकन्। आलुच् यथा-** निद्रा यस्यास्ति स निद्रालुः, तन्द्रालुः, **निद्रातन्द्राश्रद्धाभ्य आलुच्** । शीतालुः, उष्णालुः,तृपालुः- **शीतोष्णतृप्रेभ्यस्तदसहने चलुज्वक्तव्यः। चेलुर्यथा-** हिमं न सहते हिमेलुः, **हिमाच्चेलुः। ऊलच् यथा-** बलं न सहते बलूलः, **बलादूलच् तदसहने। चूलो यथा-** वातं न सहते, वातानां समूहः, इति च वातूलः, **वातात्समूहे तदसहने चूलो वक्तव्यः। अण यथा-**वसिष्ठस्यापत्यं पुमान् वासिष्ठः, **ऋष्यन्धकवृष्णिकुरुभ्यश्च** इत्यण्। उपगोरपत्यम् ऐपगवः, प्राग्दीव्यतो।णित्यधिकृत्य, **तस्यपत्यम्** इत्यण्। आश्वपतः, **अश्वपत्यादिभ्यश्च।** जनपदो निवासो यस्य स जानपदः, **सो।स्यनिवासः।** वैयाकरणः, **तदधीते तद्वेद, न य्वाभ्यां पदन्ताभ्यां पूर्वौ तु ताभ्यामैच्** इत्यैचागमः। **वुन् यथा-** क्रममधीते वेत्ति वा क्रमकः, पदकः, **क्रमादिभ्यो वुन्, युवोरनाकौ** इत्यकादेशः। **खञ् यथा-**मद्गानां भवनं क्षेत्रं मौद्गीनम्, कौद्रवीणम्, **धान्यानां भवने क्षेत्रे** खञ्। **अञ् यथा-** पञ्चालस्यापत्यं पुमान् पाञ्चालः, वैदेहः,**जनपजशब्दात्क्षत्रियादञ्। इञ् यथा-** दक्षस्यापत्यं पुमान् दाक्षिः, दाशरथिः, **अत इञ्। फक् यथा-** नडस्यापत्यं पुमान् नाडायनः, **नडादिभ्यः फक्। यञ् यथा-**

गर्गस्य गोत्रापत्यं पुमान् गार्ग्यः, **गर्गादिभ्यो यञ्। ढक् यथा-** विनताया अपत्यं पुमान् वैनतेयः, गाङ्गेयः, **स्त्रीभ्यो ढक्, आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्** इति ढकारस्य एयादेशः। ऐरक् यथा-चटकाया अपत्यं पुमान् चाटकैरः, **टचकाया ऐरक्। ढक् यथा-** गोधाया अपत्यं गौधेरः, **गोधायाढ्रक्** , लोपोव्योर्वलीति यलोपः। **आरक् यथा-** गोधाया अपत्यं गौधारः, **आरगुदीचाम्। घो यथा-** क्षत्रस्य अपत्यं क्षत्रियः, क्षत्राद्घः, घस्य ईयादेशः। **खो यथा-** कुलस्य अपत्यं कुलीनः, कुलात्खः, खस्य ईनादेशः। ण्यो यथा कुरोरपत्यं कौरव्यः, **कुर्वादिभ्यो ण्यः**। यत् यथा-मूर्ध्नि भवो मूर्धन्यः उरस्यः, दन्त्यः, **शरीरावयवद्यत्। इत् यथा-** सुष्ठु कल्याणो गन्धो यस्य सः सुगन्धिः, उद्गन्धिः, **गन्धस्येदुत्पूतिसुसुरभिभ्यः।** कुमुदगन्धिः इत्यत्र **सप्तम्युपमानपूर्वस्य बहुव्रीहिर्वाच्य उत्तरपदलोपश्च, उपमानाच्च** इति समासान्तः। **इतच् यथा-** कुसुमानि यस्य सन्ति स कुसुमितो वृक्षः, **तदस्य सञ्जातं तारकादिभ्य इतच्। अनङ् यथा-** कुण्डप्रमाणमूधो।स्याः कुण्डोध्नी- **उधसो।नङ्,** सकारस्यादेशः प्रत्ययसंज्ञा च, **बहुव्रीहेरूधसो ङीष्** । कुसुममेव धनुर्यस्य सः कुसुमधन्वा, **धनुषश्च** इत्यनङ् , सकारस्य समासान्तः। **चणप् यथा-** दर्पेण वित्तो दर्पचणः, **चुञ्चुप् यथा-**शब्देव वित्तः शब्दचुञ्चुः, **तेन वित्तश्चुञ्चुप्चणपौ।** अत्र चुटू इति इत्संज्ञा न, तस्याः अनित्यत्वात्। **इष्ठन् यथा-** सर्वे इमे पटवः, अयमेषामतिशयेन पटुः पटिष्ठः, **अतिशायने तमबिष्ठनौ**, टेरिति टिलोपः। अतिशयेन प्रियः प्रेष्ठः,

स्थेष्ठः, स्फेष्ठः, वरिष्ठः, बंहिष्ठः, गरिष्ठः, वर्षिष्ठः, त्रपिष्ठः, द्राघिष्ठः, वृन्दिष्ठः, **प्रिस्थिरस्फिरोरुबहुलगुरुवृद्धतृप- दीर्घवृन्दारकाणां प्रस्थस्फर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः** इति प्रियादीनां दशानां यथाक्रमं प्रादय आदेशाः, **प्रकृत्यैकाच्** इति प्रकृतिभावेन टिलोपाभावः। अतिशयेन स्थूलः स्थविष्ठः, एवं दविष्ठः, यविष्ठः, ह्रसिष्ठः, क्षेपिष्ठः, क्षोदिष्ठः, **स्थालदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः।** सर्वेषामतिशयेन बहुः भूयिष्ठः, **बहोर्लोपो भू च बहोः** इति भू आदेशः, **इष्ठस्य यिट् च** इति यिडागमः। सर्वेषामतिशयेन वृद्धः ज्येष्ठाः, **ज्य च** इत्यनुवर्तमाने, **वृद्धस्य च** इति ज्यादेशः। अतिशयेन प्रशस्यः श्रेष्ठः, **प्रशस्यस्य श्रः** इति श्रादेशः। लघुमृदुकृशपृथूनां लघिष्ठः, म्रदिष्ठः, क्रशिष्ठः, प्रथिष्ठः, **र ऋतोहलेदेर्लघोः** इति ऋकारस्य रादेशः। अतिशयेन अन्तिकः नेदिष्ठः, अतिशयेन बाढः साधिष्ठः, **अनितकबाढयोर्नेदसाधौ।** एवमेव तनिष्टः, अनिष्टः, पिञ्चरिष्टः। **ईयवुन् यथा-** द्वाविमौ पटू, अतिशयेनायमनयोः पटुः पटीयान्, स्थूलः स्थवीयान्, दूरः दवीयान्, युवा यवीयान्, कनीयान्, **युवाल्पयोः कनन्यतरस्याम्,** ह्रस्वः ह्रस्वीयान्, क्षिप्रः क्षेपीयान्, क्षुद्रः क्षोदीयान्, प्रियः प्रेयान्, स्फिरः स्फेयान्, स्थिरः स्थेयान्, उरुः वरीयान्, बहुलः बमहीयान्, गुरुः गरीयान्, वृद्धः वर्षीयान्, तृपः त्रपीयान्, दीर्घः द्राघीयान्, बृन्दारकः बृन्दीयान्, महान् महीयान्, साधुः साधीयान्, लघुः लघीयान्, क्रुशः क्रशीयान्, पृथुः प्रथीयान्, मृदुः म्रदीयान्, दृढः द्रढीयान्, बलवान्

बलीयान्, वृद्धः जायायान्, **ज्यादादीयसः** इति ईयसुनि ईकारस्यात्वम्, अल्पः अल्पीयान् कनीयान्। श्यामः श्यामीयान्, पिञ्जरः पिञ्जरीयान्, **द्विवचनविभज्योपपदेतरबीयसुनौ। तरप् यथा-** अयमनयोरतिशयेनकुमारः कुमारतरः। एवम् -पटुः पटुतरः, मृदुः मृदुतरः, कृशः कृशतरः, लघः लघुतरः। **विभज्येपपदे**-उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसः, **द्विवचनविभज्योपपदेतरबीयसुनौ।** अतिशयेन पचति पचतितराम्, जल्पतितराम्, **तिङ्श्चेति** तरप्, **किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे** इत्यामुप्रत्ययः। द्रव्यप्रकर्षे तु उच्चैस्तरस्तरुः। **तमप् यथा**-सर्वासामतिशयेन मृद्वी मृदुतमा, चपलतमा, **अतिशायने तमबिष्ठनौ।** कल्पप् यथा-ईषदिन्द्रो न समाप्यते इन्द्रकल्पः, **देश्यो यथा-** ईषत्पर्वतो न समाप्यते पर्वतदेश्यः, **देशीयर् यथा-** ईषद्राजा न समाप्यते राजदेशीयः **ईषदसमाप्तौ कल्पब्देश्यदेशीयरः।** जातीयर् यथा- पटुप्रकारः पुटुजातीयः, मृदुजातीयः, समजातीयः, **प्रकारवचने जातीयर्। द्वयसच् यथा-** जानुप्रमाणमस्य जानुदघ्नम्, **मात्रच् यथा-** आस्यं प्रमाणमस्य आस्यमात्रम्, **प्रमाणे द्वयसज्दघ्नञ्मात्रचः। ठक् यथा-** द्वारे नियुक्तो दौवारिकः, **तत्र नियुक्त** इति ठक्, **द्वारादीनां च** इति ऐजागमः। अक्षैर्दीव्यति आक्षिकः, खनित्रेण खनति खानित्रिकः, मुष्टिना जयति मौष्टिकः, **तेन दीव्यति खनति जयति जितम्** इति ठक्। दध्ना संस्कृतं

दाधिकम्, **संस्कृतम्** इति ठक्। एवमेव मरीचेन संस्कृतमिति मारीचिकम्, **ठस्येकः, किति च** इत्यादिवृद्धिः।

## सामान्याख्याततद्धितः

मतुब्वलजिलज्लज्वशनणोरिजिनज्युसः।

विनिग्मिनीठन्नालूज्रोलच्चेलूश्च चूलवत्।

आलटारकनण्वुन्खञञिञ्फग्यञ्ढगैरकः।

तरप्तमप्तथा कल्पदेश्यदेशीयरोऽपि च।

जातीयरिष्ठनीयसुन्ढ्चसज्दघ्नमात्रचः।

ठक्केति पञ्चपञ्चाशत्सामान्यप्रत्ययाः स्मृताः।

## उदाहृतिः

श्रीमान् कृषीवलश्चैव फेनिलो वत्सलस्तथा।

केशवो लोमशश्चैव वामनप्राज्ञदन्तुरः।

फेनिलो(फलिनो)र्णायुतेजस्विवाग्मिनो दण्डिदण्डिकौ।

शीतालूपरवातूला हिमेलूश्च बलूलवत्।

श्रृङ्गारकश्च वाचाटवाचालौ बहुभाषिणि।

वासिष्ठः क्रमकश्चैवमैद्गीनः कौसलस्तथा।

दाक्षिर्नाडायनो गार्ग्यो गाङ्गेयश्चाटकैरवत्।

गैधेरश्चैव गैधारः कुलीनः क्षत्रियसितथा।

कौरव्यश्चैव कुण्डोध्नी मूर्धन्योद्दन्धयस्तथा।

फलितो रक्षणचणो विद्याचुञ्चुस्तथैव च।

राजदेश्योऽर्कदेशीयः पटुजातीय एव च।

बंहिष्ठश्च महीयांश्च जठरद्वयसस्तथा।

ऊरुदघ्नः कण्ठमात्रा आक्षिकश्चेत्युदाहृतः।

अव्ययाख्यस्तद्धितः कतमः? तसिल्, त्रल्, अधुना, दानीं, दा, र्हिल्, ह, अत्, थाल्, थमु, अस्तातिः, द्यस्, उत्, आरिल्, समसण्, एद्यवि, द्य, एद्युस्, अतसुच्, आति, रिल्, रिष्टातिल्, एनप्, आच्, आहि, धा, ध्यमुञ्, धमुञ्, एधाच्, आम्- इति त्रिंशत्प्रत्ययाः। **तरिल् यथा**- कस्मादित्यर्थे कुतः, **कु तिहोः** इति किमः कुः। सर्वस्मात्, सर्वतः, यस्मात् ततः, तस्मात् ततः, **पञ्चम्यस्तसिल्, प्राग्दिशो विभक्तिरिति** विभक्तिसंज्ञा, **त्यदादीनामः, इदम इश्,** अस्मात् इतः। एतस्मात् अतः, **एतदो।श्** इति अश्भावः। **तद्धितश्चासर्वविभक्ति** रित्यव्ययसंज्ञा, **अव्ययादाप्सुपः** इति सुपो लूक्। आदितः (इतराभ्यो।पि दृश्यते) अन्येभ्योपि दृश्यते इति वचनात् तसिल्। **त्रल् यथा**-तस्मिन् तत्र, अमुष्मिन् अमुत्र, एतस्मिन् अत्र, यत्र, बहुत्र, कुतः, **किंसर्वनामबहुभ्यो।द्व्यादिभ्यः** इत्यधिकृत्य, **सप्तम्यास्त्रल्, अदसो।सेर्दादुदोमः** इत्युत्वं मत्वं च दस्य। **अधुना यथा**-अस्मिन् काले अधुना इति निपात्यते। **दानीं**

**यथा**-अस्मिन् काले इदानीम्। **दा यथा**-सर्वदा, एकदा,अन्यदा,कदा,यदा, तदा, **सर्वैकान्यकिंयत्तदः काले** इति दा प्रत्ययः, **सर्वस्य स।न्यतरस्या**मिति सदा। **र्हिल् यथा**-तस्मिन् काले तर्हि, कर्हि, यर्हि, **अनद्यतने र्हिलन्यतरस्याम्।** अस्मिन् काले एतर्हि, **इदमो र्हिल्, एतेतौ रथोः** इति रेफथकारयोः परतो एत -इत इति आदेशौ। **हयथा**-अस्मिन् काले इह, **इदमो हः, त्रलो।**पवादः, **इदम इश्। अत् यथा**-क्व, **किमो।त्** इति अत्, **क्वाति** इति किमः क्वादेशः। **थाल् यथा**-येन प्रकारेण यथा, तथा, सर्वथा, **प्रकारवचने थाल्। थमुः यथा**-अनेन प्रकारेण-इत्थम्, **इदमस्थमु**रिति थमुः। केम प्रकारेण कथम्, **किमः कः। अस्तातिः यथा-** पूर्वस्यां दिशि वसति, पूर्वस्या दिश आगतः, पूर्वा रमणीया दिक् इति वा, पुरस्तात् वसति, आगतः रमणीया वा, **दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्योदिग्देशकालेभ्यो।स्तातिः, पूर्वाधरावराणामसि पुरधवश्चैषाम्** इति वर्तमाने **अस्ताति च**

इति पूर्वादीनां पुरादयः। **द्यस् यथा-** समाने।ह्नि सद्यः इति निपात्यते, सद्यःपरुत्परार्यैषम इति समानस्य

सभावो द्यस्प्रत्ययश्चाहन्यभिधीयते।**उत् आरिश्च यथा-** पूर्वस्मिन् वत्सरे परारि, पूर्वपूर्वतरयोः परभावः उदारी प्रत्ययौ च भवतः संवत्सरे अभिधेये। **समसण् यथा-** अस्मिन् वत्सरे ऐषमः, इदं शब्दात् समसण्, इदम इश्भावः, **तद्धितेष्वचामादेः** इति आदिवृद्धिः। **एद्युविर्यथा-** परस्मिन्नहनि

परेद्यविः, परस्मेद्यविप्रत्ययः। **द्यो यथा**-अस्मिह्नहनि अद्य। **एद्युस् यथा**-पूर्वस्मिन्नहनि पूर्वेद्युः , अपरेद्युः, अन्येद्युः, अन्यतरेद्युः, इतरेद्युः, अधरेद्युः, उभयेद्युः, उत्तरेद्युः, **पूर्वान्यायन्यतरतराधरोत्तरोभयोत्तरेभ्य एद्युस्** । **अतसुच् यथ**- दक्षिणस्मिन् देशे, दिशि वास्यां, वसति दक्षिणतो वसति, **दक्षिणोत्तराभ्यामतसुच्। आतिर्यथा**-उत्तरस्मिन् देशे वसति उत्तराद्वसति, उत्तरादागतः,**उत्तराधरदक्षिणादाति**रित्यस्तातिः। **रिल् यथा**-ऊर्ध्वं वसति उपरि वसति। **रिष्टातिल् यथा**- ऊर्ध्वं वसति, उपरिष्टाद्वसति। **उपर्युपरिष्टात्** , ऊर्ध्वस्योपभावः, रिल्रिष्टातिलौ प्रत्ययौ च भवतः।**एनप् यथा**- दक्षिणा रमणीयः पूर्वो देशो रमणीयः, **एनबन्यतरस्यामदूरे।पञ्चम्याः** ।**आच् यथा**- दक्षिणा रमणीयः, दक्षिणादाच्। **आहिर्यथा**- दक्षिणस्यांदिशि ग्रामस्य दूरे वसति दक्षिणाहि ग्रामाद्वसति, **आहि च दूरे** इत्याहि प्रत्ययः। **धा यथा**- कतिप्रकारः कतिधा, बहुधा, **संख्याया विधार्थे धा। ध्यमुञ् यथा**-एकधा ऐकध्यं कुरु, **एकाद्धो ध्यमुञन्यतरस्याम्। धमुञ् यथा**- द्वैधं, त्रैधम्, **द्वित्र्योश्च धमुञ्। एधाच् यथा**-द्वेधा, त्रेधा, **एधाच्च। आम् यथा**- चिरन्तरमेव चिरन्तराम्, अतितराम्, **किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे**।।

**अव्ययाख्याततद्धितसंग्रहः**

तसिल्त्रलधुनादानीं दा र्हिल्हात्थाल्थमुस्तथा।

अस्तातिर्थसुदारी च समसण्धैद्युसेद्यविः।

रिलातिरेनबतसुञ्रिष्टातिल्धा ध्यमुञ् धमुञ्।

अजाह्येधाजामिति स्युस्त्रिंशदव्ययतद्धिताः।

**उदाहृतिः**

ततस्तत्राधुनेदानीं तदा तर्हि चेत्यपि।

क्व सर्वथा कथं चैव पुरस्तात्सद्य एव च।

परुत्परार्यैषमोऽद्य पूर्वेद्युश्च परेद्यवि।

उपर्यप्युत्तराच्चैव पूर्वेणोत्तरतोऽपि च।

उपरिष्टाद्द्विधैकध्यं द्वैधमित्यपि दक्षिणा।

दक्षिणाहीत्यपि त्रेधा किन्तरामित्युदाहृतिः।

अथ भाववाचकाः कतमः? त्व, तल्, इमनिच्, ष्यञ्, यत्, यः, ढक्, यक्, अञ्, अण्, वुञ्, इत्येकादशप्रत्यया भवन्ति। **त्वतलौ यथा-** पटोर्भावः पटुत्वं पटुता, **तस्य भावस्त्वतलौ। इमनिच् यथा**-गुरोर्भावो गरिमा, पटिमा, अणिमा, तनिमा, स्थालस्य भावः स्थविमा, दविमा, महिमा, प्रेमा, क्षप्रस्य क्षेपिमा, बहुलस्य बंहिमा, दीर्घस्य द्राघिमा, बहोः भूमा, शीतस्य शीतिमा, कृशस्य क्रशिमा, **पृथ्वादिभ्य इमनिज्वा। ष्यञ् यथा-** श्वेतस्य भावः, श्वैत्यं, नैल्यं, दार्ढ्यं, सौभाग्यम्, **वर्णादृदिभ्यः ष्यञ्,** सौभाग्यमित्यत्र

**हृद्भगसिन्ध्वन्ते पूर्वपदस्य च** इति उभयपदवृद्धिः। यत् यथा- स्तेनस्य भावः स्तेयम्, **स्तेनाद्यन्नलोपश्च** इति यत्। **यो यथा**-सख्युर्भावः सख्यम्, **सख्युर्यः** इति यः। **ढक् यथा**- कपेर्भावः कापेयम्, ज्ञातेयम्, **कपिज्ञात्योर्ढक्** । **यक् यथा**- बृहस्पतेर्भावो बार्हस्पत्यम्, प्राजापपत्यम्, पौरोहित्यम्, **पत्यन्तपुरोहितादिभ्यो यक्। अञ् यथा**- अश्वस्य भावः आश्वम्, उष्ट्रस्य भावः औष्ट्रम्, कुमारस्य भावः कौमारम्, **प्राणभृज्जातिवयोवचनोद्गात्रादिभ्यो।ञ्। अण् यथा**-त्रिहायनस्य भावः त्रैहायनम्, द्वैहायनम्, चतुर्हायनम्, यूनो भावः यौवनम्, स्थाविरम्, **हायनान्तयुवादिभ्यो.ण्।** मुनेर्भावो मैनम्, पृथोर्भावः पार्थवम्, मार्दवम्, गौरवम्, इत्यत्र **इगन्ताच्च लघुपूर्वादि**त्यण्। **वुञ् यथा**- रमणीयस्य भावो रामणीयकम्, वासनीयकम्,आचार्यकम्, **योपधाद्गुरूपोत्तमाद्वुञ्।**

### भाववाचकतद्धितसंग्रहः

त्वतलाविमनिज्यद्यष्यञो ढग्यञस्तथा।

अणवुञाविति भावार्था एकादश समीरिताः।

### उदाहृतिः

पटुत्वं पटुता चैव पटिमा स्तेयमित्यपि।

सख्यं दार्ढ्यञ्च कापेयं प्राजापत्यं तथैव च।

कौमारं स्थाविरं चैव रामणीयकमित्यपि।

**।।इति तद्धितलक्षणसंग्रहः समाप्तः।।**

## अथ तिङ्लक्षणसंग्रहः

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA
वन्दे सद्गुरुं चन्द्रशेखरम्
KANCHEEPURAM
SCSVMV

**तिङां नव च पूर्वार्धे लाशावपरौ द्विधा।**

**परस्मैपदमाख्यातं तङानावात्मनेपदम्।।**

एवं तद्धितप्रयोगमभिधाय अनन्तरं तिङ्प्रयोगाभिधानमत्र क्रियते। तिङ् कतमः? तिप्, तस्, झि, सिप्, थस्, थ, मिप्, वस्, मस् ; त,आताम्,झ,थास्, आथाम्, ध्वम्, इट् वहिङ्, महिङ् इत्यष्टादशधा तिङः वेदितव्याः। तत्र तिङ्समूहे दशधा संज्ञा- प्रत्ययसंज्ञा, विभक्तिसंज्ञा, परस्मैपदसंज्ञा, आत्मनेपदसंज्ञा, प्रथमपुरुषसंज्ञा, मध्यमपुरुषसंज्ञा, उत्तमपुरुषसंज्ञा, एकवचनसंज्ञा, द्विवचनसंज्ञा, बहुवचनसंज्ञा चेति। केषां प्रत्ययसंज्ञा ? सर्वेषामष्टादशानां तिङां प्रत्ययसंज्ञा, तेषामेव विभक्तिसंज्ञा च। परस्मैपदमिति- तिङां नव पूर्वाणि वचनानि, यौ द्वावपरौ लादेशौ शतृक्कसू इत्येकादशधा परस्मैपदमुक्तम्। तङ् च आनश्च तङानि, तङित्यनेन तिङामुत्तराणि नव वचनानि गृह्यन्ते, आन इति शानच्कानचोरुत्सृष्टानुबन्धयोर्ग्रहणम्, एवमात्मनेपदमेकादशधा।

तिङां तिप्तस्झिसिप्थस्थमिब्वस्मसिति ये नव।

शतृ क्वसुश्च ते सर्वे परस्मैपदसंज्ञकाः।

तथा ताताञ्झथासाथान्ध्वमिड्वहिमहिङ् नव।

शानच् कानच्च कथिता आत्मनेपदसंज्ञकाः।।

**परस्मै चात्मने भागे वचनानि त्रिधा त्रिधा।**

**त्रयस्ते पुरुषा ज्ञेयाः प्रथमो मध्यमोत्तमौ।।14।।**

**परस्मै इति।** उभयपक्षेऽपि प्रथममध्यमोत्तमपुरुषा वेदितव्याः, परस्मैपदपक्षे आत्मनेपदपक्षे च। परस्मैपदात्मनेपदसंज्ञकानां प्रत्ययानां त्रीणि त्रीणि वचनानि प्रथममध्यमपुरुषोत्तमपुरुषसंज्ञकानि भवन्ति। परस्मैपदभागे-तिप्, तस्, झि, इति प्रथमपुरुषः, सिप्, थस्, थ इति मध्यमपुरुषः, मिप्, वस्, मस् इति उत्तमपुरुषः। एवमात्मनेपदे।पि वेदितव्यम्।

प्रथमः पुरुषो ज्ञेयस्तिप्तस्झिवचनत्रयम्।
सिप्थस्थ मध्यमो ज्ञेयो मिब्वस्मसिति चोत्तमः।
पुरुषत्रितयं ज्ञेयमेवमेवात्मनेपदे।।

**एकद्विबहुसंज्ञानि पदान्येकैकशस्तिङाम्।**
**परस्मै कर्तरि ज्ञेयं न भावे नापि कर्मणि।।15।।**

**एकेति।** यानि यानि तिङ्पदानि सर्वाणि तान्येकश एकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति। तिप् इत्येकवचनम्, तस् इति द्विवचनम्, झि इति बहुवचनम्। एवमेव अन्येषामपि वेदितव्यम्।परस्मैपदं कर्तर्येव प्रयोक्तव्यं, न भावकर्मणोः। ननु यदि परस्मैपदं कर्तर्येव प्रयोक्तव्यं, कर्हि कथं लोके पच्यति, क्रियति इत्यादि शब्दरूपं परस्मैपदसंज्ञकं न भवति? अत्र तु तङ्व्यत्ययेन तिङ्पदमिति

शास्त्रकारवचनप्रामाण्यादात्मनेपदस्थाने परस्मैपदं भवति, तस्मात् सत्यपि परस्मैपदश्रवणे आत्मनेपदं ज्ञातव्यम्।

तिबेकवचनं तस् द्विवचनं झि बहु स्मृतम्।

एवमन्यदपि ज्ञेयमेकद्विबहुसंज्ञितम्।।

**आत्मने तु त्रिषु ज्ञेयं भावे कर्तरि कर्मणि।**

**धातोरकर्मकाद्भावे प्रथमैकवचनस्तथा।।16।।**

**आत्मन इति।** आत्मनेपदं भावे कर्तरि कर्मणि च भवति। तत्र भावे त्रिष्वपि पुरुषवचनेषु प्रथ मपुरुषैकवचनमेव भवति, यथा- स्थायते देवदत्तेन आवाभ्यां युष्माभिर्वा। न कदाचिदपि स्थीयेते स्थीयन्ते इति वा भवति।

गृहे वसति गोविन्दः स्थीयते मधुवैरिणा।

मुदं दत्ते मुरारातिः सेव्यते रमया हरिः।

भूयते। थैंन भूयेते भूयन्ते इति वा नहि।।

**सकर्मकाकर्मकाद्धातोः कर्तरि स्मृतमात्मनेपदे।**

**यत्तु कर्मणि निर्दिष्टं क्रियते तत् सकर्मकात्।।17।।**

**सकर्मेति।** यदा आत्मनेपदं कर्तरि भवति, तदा सर्वस्मादपि धातोर्भवति सकर्मकादकर्मकाच्च। सकर्मकात्तावत्- कटं कुरुते देवदत्तः-**स्वरितञितः कर्त्रभिप्राये क्रियाफले** इति आत्मनेपदम्। अकर्मकात्- शेते देवदत्तः-**अनुदात्तङित**

**आत्मनेपदम्** इति आत्मनेपदम्। यत्पुनरात्मनेपदं कर्मणि निर्दिष्टं तत् सकर्मकादेव धातोः भवति, नाकर्मकात्, यथा-कटः क्रियते राजपुरुषेण-**भावकर्मणोः** इति आत्मनेपदम्, **सार्वधातुके यक्** इति यक्।

श्रेयांसि कुरुते विष्णुः शेते। नन्ते जगत्पतिः।

क्रियते देवदत्तेन कट इत्याद्युदाहृतिः।।

**नाम्नैव स नियोक्तव्यः प्रथमः पुरुषो भवेत्।**

**त्वां युवां यूयमित्येभिस्त्रिभिरेव तु मध्यमः।।18।।**

**नाम्नैवेति।** नामपदैरेव भवदादिभिः प्रथमपुरुषो युज्यते, न युष्मदस्मत्पदाभ्यामिति भावः, यथा-जयति ब्राह्मणः। मध्यमपुरुषः केन सह प्रयुज्यते? युष्मत्पदैरेव न नामपदैः नाप्यस्मत्पदैः। सर्वविभक्त्यन्तैः युष्मत्पदैर्वा नेत्याह-**त्वमिति।** यथा-त्वं जयसि, युवां जयथ, यूयं जयथ।।

प्रथमः पुरुषो नामपदैः स्याद्भवदादिभिः।

नृपो भाति नृपौ भातो नृपा भान्तीत्युदाहृतिः।

भासि त्वं च युवां भाथो यूयं भाथेत्युदाहृतिः।।

**अहमावां वयन्त्वेभिरुत्तमो नान्यथा मतः।**

**अन्यथा च प्रहासे स्यात् त्वं मन्येऽहं च भोक्ष्यसे।।19।।**

उत्तमो न नामपदैः संप्रयुज्यते, न युष्मत्पदैश्च। किन्तर्हि? अस्मत्पदैरेव। यथा-अहं जयामि, आवां जयावः, वयं जयामः। किमस्मत्पदैरेवोत्तमः प्रयुज्यते उतान्यथापि प्रयुज्यते इत्यत आह-**अन्यथेति।** तथाहि एहि मन्ये भोक्ष्यसे- इति प्रहासे परिहासे प्रयोगः। मन्ये त्वं भोक्ष्यसे अहम्, इति णध्यमोत्तमपुरुषयोर्वत्यासः प्रहासे एव, नान्यत्र।

**अहं भामि तथैवावां भावो भामो वयं तथा।**

अथ के पुनर्लादेशाः? लडादिदशलकाराणामादेशा लादेशाः । ते यथा-

लट्  च लङ् च तथा लोट् च लिङाशीर्लिङ्लिटस्तथा।

लुङ्लुटौ लृङ्लृटौ चैव लकारा दश कीर्तिताः।

धातोः सकर्मताद्ज्ञेया लकाराः कर्तृकर्मणोः।

अकर्मकात्तथा धातोर्भावे कर्तरि च स्मृताः।

भूते लुङ्लङ्लिटो नान्ये लृड्लुटौ भविष्यति।

लिङ्लोटावाशिषि विधौ वर्तमाने लडुच्यते।

भवत्वित्यादि लोड्रूपं भवेदित्यादि लिङ् तथा।

भूयादित्यादि चाशीर्लिङ् बभूवेत्यादिकं तु लिट्।

अभूदित्यादि लुङ्रूपं भवितेत्यादि लुट्तथा।

अभविष्यन्मुखं लृङ् स्यात् भविष्यत्यादिकं तु लृट्।

एतत्परस्मैरूपं स्याद्भूप्राप्तावात्मने यथा।
भवते इति लड्रूपं लङ् स्यादभवतादिकम्।
भवतां लोट् लिङ् भवेत् भविषीष्ट लिङाशिषि।
लिङ्बभूवे चाभविष्ट लूङ् लूट् स्याद्भवितादिकम्।
अभविष्यत लृड्रूपं लृङ्रूपं तु भविष्यते।
तिबादयो।ष्टादश च शतृ क्वसुरिमौ तथा।
शानच्कानजिति द्वौ च लादेशाः परिकीर्तिताः।।

उक्तं हि तिङ्गरूपमात्रं, तिङ्गयोगस्तु कश्चिद्विस्तरेण वक्ष्यते। अस्ति स कश्चित्प्रयोगः। तस्य कर्मणि प्रथमा यथा- वृक्षः छिद्यते तक्षकेण। कदाचित् द्वितीया स्यात्, यथा-वृक्षं छिनत्ति तक्षकः। क्वचित् षष्ठी, यथा-वृक्षस्य रुजति रोगः, **रुजार्थानां भाववचनानामज्वरेः** इति षष्ठी। शत्रूणां पिनष्टि राजा, **जासिनिप्रहणनाटक्राथपिषां हिंसायाम्** , कदाचित् चतुर्थी, यथा-ग्रामाय व्रजति पुरुषः, **गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि** इति चतुर्थी, द्वितीया च।

द्विकर्मको यो णिजन्तः तस्मात् द्वितीयाप्रयोगं प्रदर्शयिष्यामः। णिजन्तेभ्यः धातुभ्यः कर्मविवक्षायां द्वे कर्मणी अभिधीयेते, प्रधानमप्रधानं चेति। तत्र तिङा प्रधानकर्माभिधीयते, यतो भाष्यकार एवमाह-

**प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।**

**अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः।।**

कोऽर्थः? द्विकर्मकेषु धातुषु कर्मविवक्षायां तिङा प्रधानकर्माभिधीयते। अभिहितत्वाच्च कर्मणः प्रथमैव भवति। अप्रधाने पुनरभिहितत्वात् द्वितीयैव भवति। कर्तर्यनभिहिते तु तृतीया भवति। किमुदाहरणम् ? नीयते देवदत्तेन अजा ग्रामम्, आकृष्यते गौर्गोपालकेन व्रजम्। दुहादीनां धातूनां प्रयोगे कर्माविवक्षायामप्रधानं कर्माभिधीयते तिङ्देन। के पुनर्दुहादयः?

**दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ।**

**ब्रुविशासि गुणेन च यत्सचते तदकीर्तितमाचरितं कविना।।**

द्विकर्मकवचनं नीवहिकृषिहरतिगत्याद्यर्थानामपि भवति।

दुहिर्यथा- दुह्यते गौर्देवदत्तेन,

याचिर्यथा- याच्यते राजा ब्राह्मणेन धनम्,

रुधिर्यथा-रुध्यते गौर्देवदत्तेन व्रजम्,

प्रच्छिर्यथा-पृच्छ्यते भिक्षुको वानप्रस्थेन ग्रामम्,

**ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति** इति संप्रसारणम्।

भिक्षिर्यथा- भिक्ष्यते गोपालको माणवकेन क्षीरम्,

चिञ् यथा- चीयते तरुर्देवदत्तेन फलानि, **अकृत्सार्वधातुकयोः** इति दीर्घः।

ब्रुविर्यथा- उच्यते धर्ममृषिणा सुजनः, **ब्रुवो वचिः** इति वच्यादेशः।

शासिर्यथा- शिष्यते शास्त्रं गुरुणा शिष्यः, **शास इदङ्हलोः** इति अकारस्येत्वम्।

ण्यन्तेभ्यःधातुभ्यः कर्ता कर्मभूतः स एवाभिधीयते। किमुदाहरणम् ? गच्छति भृत्यो ग्रामम्- गमयति भृत्यं ग्रामं राजा--गम्यते भृत्यो राज्ञा ग्रामम्।

बुध्यते शास्त्रं शिष्यः--बोधयति शास्त्रं शिष्यं गुरुः-बोध्यते शास्त्रं शिष्यो गुरुणा।

ओदनं भङ्क्ते ब्राह्मणः--भोजयति ब्राह्मणमोदनं देवदत्तः--भोज्यते ब्राह्मण ओदनं देवदत्तेन।

पठति माणवकः शास्त्रम्--पाठयति माणवकं शास्त्रमुपाध्यायः--पाठ्यते माणवकः शायोः स्त्रमुपाध्यायेन।

आस्ते आसनम् अतिथिः--आसयत्यासनमं अतिथिं नागरिकः--आस्यते आसनम् अतिथिर्नागरिकेण।

**नीवह्योः प्रतिषेधो वाच्यः।** कथं प्रतिषेधः? गतिबुद्धीत्यादिना नीवह्यादीनामण्यन्तानां यः कर्ता सः, णाविति सति, कर्मसंज्ञा मा भूत्। किमुदाहरणम् ? देवदत्तो ग्रामं नयति गाम्--नाययति गां ग्रमं देवदत्तेन यज्ञदत्तः। कर्तर्यनभिहिते कर्मणि पुनरभिहिते --यज्ञदत्तेन नाय्यते गौर्ग्रामं देवदत्तेन। एवमेव--वहति भारं देवदत्तो ग्रामम्, वाहयति भारं देवदत्तेन ग्रामं यज्ञदत्तः, यज्ञदत्तेन वाह्यते भारो देवदत्तेन ग्रामम्।

**सर्वत्र प्रत्यवसानार्थे अदेर्ण्यन्तस्य प्रतिषेधो वक्तव्यः।** यद्यत् कार्यं प्रत्यवसाने निर्दिष्टं तस्य सर्वस्य विधौ अत्तेर्धातोः अक्तान्तस्य ण्यन्तस्य प्रतिषेधः। किमर्थम् ? णिजन्तस्यादेर्निगरणचलनार्थेभ्यश्चेत्यनेन सूत्रेण परस्मैपदं प्राप्तम्, तत् मा भूत्, गतिबुद्धीत्यादिना यः कर्ता पूर्वः तस्य कर्मसंज्ञा च मा भूत्। यथा- अतित पायसं देवदत्तः, आदयते पायसं देवदत्तेन यज्ञदत्तः, आद्यते पायसं देवदत्तेन यज्ञदत्तः। यदि वक्तव्यं नास्ति, तदा एवं प्रयोगो भविष्यति--आदयति पायसं देवदत्तं यज्ञदत्तः।

अक्तान्तस्य ण्यन्तस्येति किम् ? इदमेषां जग्धम्। **क्तो।धिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः** इति क्तः, **अदो जग्धिर्ल्यप्ति किति** इति जग्धिरादेशः। भक्षेरहिंसायामर्थे कर्तुः कर्मसंज्ञाप्रतिषेतिधः, यथा-भक्षयति पिण्डं देवदत्तः। अयं णिच् चुरादिलक्षणः, न पुनः हेतुमति च इत्यनेन विहितः। हेतुमल्लक्षणे विधीयमाने एवं प्रयोगः-- भक्षयति पिण्डं यज्ञदत्तेन देवदत्तः, अत्र न कर्मसंज्ञाप्रतिषेधः। अहिंसायामिति किम् ? भक्षति बलीवर्दान् यवसान् यज्ञदत्तः। **वहेरनियन्तृकर्तृकस्य** -वहेर्धातोरनियन्तृकर्तृकस्याण्यन्तस्य यः कर्ता तस्य ण्यन्तस्य कर्मसंज्ञाप्रतिषेधो वाच्यः। तथाहि- वहति बलीवर्दो भारम्, वाहयति बलीवर्देन भारं यज्ञदत्तः। अनियन्तृकर्तृकस्येति किम् ? वाहयन्ति बलीवर्दान् भारं पथिकाः, बलीवर्देषु भारं नीयमाना इत्यर्थः। उक्तो।यं तिङ्योगः।

शब्लुकौ श्लुश्यनौ श्नुश्शश्नमुश्ना णिजिति क्रमात्।

प्रत्यया भ्वद्ध्वद्विषुञ्तुद्रुधतन्क्रीचुरादिगाः।

भवतीत्यादयः शब्विकरणस्थितधातवः।

अत्याद्या लूग्विकरणा जुहोत्याद्याः श्लुसंश्रिताः।

दीव्यत्याद्याः श्यन्पठिताः सुनोत्याद्याः श्नुसंयुताः।

तुदत्याद्याः शपठिताः रुणद्ध्याद्याः श्नममन्विताः।

तनोत्याद्या उपठिताः श्ना क्रीणातिमुखस्तथा।

णिच् चोरयतिमुख्यास्तु दशैते कर्तरि स्मृताः।

यग्भावकर्मणोर्ज्ञेयो भूयते क्रियते मया।

लडादिषु चतुर्ष्वेव शबाद्याश्च्लिर्लुङि स्मृतः।

स्यतासी लृल्लुटोर्ज्ञेयौ लुङि चिण् भावकर्मणोः।

सुखेनाभावि कृष्णेन  जयो।कारीति चिण् भवेत्।

कर्मणि प्रथमा ज्ञेया द्वितीया कुत्रचिद्भवेत्।

षष्ठी क्वचित्क्रियायोगे चतुर्थी च कदाचन।

तक्ष्णा सम्भिद्यते वृक्षः तक्षा वृक्षं छिनत्ति च।

वृक्षस्य रोगो रुजति चैत्रो ग्रामाय गच्छति।

प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।

अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः।

तिङा प्रधानकर्माभिधीयते हि द्विकर्मके।

तथा कर्मविवक्षायामप्रधानं दुहादिषु।

अणौ कर्ता कर्मभूतो ण्यन्ते यः सोऽभिधीयते।

आकृष्यते गौर्गोपेन व्रजं गौर्दुह्यते पयः।

गम्यते देवदत्तेन यज्ञदत्तो नृपालयम्।

**।।इति तिङ्प्रयोगसंग्रहः।।**

एवं तिङ्प्रयोगमभिधाय कृत्प्रयोगमवसरप्राप्तं वक्ष्यामः--

**कृतस्त्रिष्वपि वर्तन्ते भावे कर्तरि कर्मणि।**

**अजब्ल्युट्क्तिन्घञो भावे युजकाराङ्श एव।।**

यथा तिङ्प्रत्यया भावकर्मकर्तृषु भवन्ति, तथा कृत्प्रत्यया अपि स्युः। भावे तु अच्, अप्, ल्युट्, क्तिन्, घञ्, युच्, अ, अङ्, शः इत्येते भवन्ति, न कर्मणि नापि कर्तरि तेषां प्रयोगः। **अच् यथा-** शराणां निकरः, भवः, प्रभवः, उपद्रवः, उपप्लवः, प्रणवः, **ऋदोरप्** (3-3-57)इति अप्। निग्रहः, वरः, इत्यादौ **ग्रहवृदृनिश्चिगमश्च** (3-3-58) इत्यप्। अजबन्ताः सर्व एते पुंसि भवन्ति। **ल्युट् यथा-** ओदनस्य पचनम्, आचमनम्, वचनम्, शरणम्, आसनम्, यानम्, वाहनम्, शासनम्, गानम्, **ल्युट् च** (3-3-115)। **करणाधिकरणयोश्च** (3-3-117) इति च ल्युट् भवति, यथा-

पुनात्यनेन पवनम्, बिभर्त्यनेन भरणम्, श्रृणोत्यनेन श्रवणम्, करणम्, चरणम्, अधिकरणम्, वृणोत्यस्मिन्निति वरणम्, शयनम्, इत्यादि। ल्युडन्तं सर्वं नपुंसकम्। **क्तिन् यथा-** पुण्यस्य कृतिः, **कर्तृकर्मणोः कृति** (2-3-65) इति षष्ठी। एवमेव गतिः, मतिः, सृतिः, बुद्धिः, सिद्धिः, भित्तिः, उदितिः, ऋद्धिः, पुष्टिः, उप्तिः, प्राप्तिः, **स्त्रियां क्तिन्** (3-3-94)। स्थानं स्थितिः, अत्र **स्थागापापचो भावे** (3-3-95) इति क्तिन्, **घुमास्थागापाजहातिसां हलि** इतीत्वम्। **घञ् यथा-**ओदनस्य पाकः। ओवं रागः, पादः, भावः, भेदः, **भावे च** (4-4-144) इति घञ्। **युच् यथा-**कारणा, चेतना, छेदना, वेदना, यातना, योजना, शोषणा, इत्येवमादयः, **ण्यासश्रन्थो युच्** (3-3-107) **अकारो यथा-** चिकीर्षा, जिगमिषा, चिकित्सा, जिघत्सा, बुभुक्षा, तितिक्षा, जिज्ञासा, **अः प्रत्ययात्** (3-3-102) इत्यप्रत्ययः। ईक्षा इत्यत्र **गुरोश्च हलः** (3-3-103) इत्यप्रत्ययः। **अङ् यथा-** उपधा, अभिख्या, **आतश्चोपसर्गे** (3-3-106) इत्यङ्। भिदा, जरा, तृष्णा, इत्यत्र **षिद्भिदादिभ्यो।ङ्** (3-3-104) इत्यङ्, **ऋद्दशो।ङि गुणः** ()।**शः यथा-** क्रिया, **कृञश्श च**(3-3-100) इति शः, **रिङ्गयग्लिङ्क्षु** ( ) इति रिङादेशः।

चयो गरश्च वचनं कृतिः पाकश्च धारणा।

चिकित्सा चोपधा चैव क्रियेत्येषामुदाहृतिः।।

उक्ताः केवलभाववाचिनः। मिश्रवाचकाः कृत्प्रत्यया उच्यन्ते **सकर्मेति-**

**सकर्माकर्मकाद्धातोः क्तो भवेत्कर्मभावयोः।**

**कृत्याश्चैव शलर्थाश्च तयोरेवानुवर्णिताः।।**

यदा क्तप्रत्ययः कर्मणि भवति, तदा सकर्मकादेव भवति। यदा पुनः क्तो भावे स्यात्, तदा अकर्मकात् धातोः भवति। यदा वा सकर्मकेभ्यो धातुभ्यः क्तो भवति, तदा कर्मण्येव वर्तते, यदा अकर्मकेभ्यो धातुभ्यो भवति, तदा भावे वर्तते। यदा अकर्मकेभ्यो धातुभ्यो भवति, तदा भावे वर्तते, न कर्तरि, इत्यर्थः। यदा अकर्मकाद्वा सकर्मकाद्वा धातोः भावे वर्तते तदा ससकर्तृका विभक्तिरुपादीयते षष्ठी। **भावे अकर्मके क्तो यथा**-देवदत्तस्य भूतम्। तथैव **भावे सकर्मके क्तो यथा**- देवदत्तस्य गतम्। **नपुंसके भावे क्तः** इति क्तप्रत्ययः, **क्तस्य च वर्तममाने क्तः** इति कर्तरि षष्ठी। गतमित्यत्र **अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति** इति सूत्रेण अनुनासिकस्य लोपः। तृतीया कदाचिदिष्यते- देवदत्तेन भुक्तम्, **कर्तकरणयोस्ततीयैव**, नान्या विभक्तिरुपादीयते, यथा- देवदत्तेन इह अवतीर्णः समुद्रः। अवतीर्णः इत्यत्र, **रदाभ्यां निष्ठातो नः पूर्वस्य च दः** इति निष्ठातस्य नः। तयोः भावकर्मणोरेव कृत्याः खलर्थाश्च भवन्ति।

तव्यत्तव्यानीयरो यत् क्यप् ण्यत् खल् युच् तथैव च।

इत्येते प्रत्ययाः कृत्याः खलर्थाश्च प्रकीर्तिताः।।

**तव्यत् तावत्-** भोक्तव्य ओदनो देवदत्तेन, देवदत्तस्य वा, **कृत्यानां कर्तरि वा** इति षष्ठी, यदा षष्ठी न तदा तृतीयैव। **तव्यो यथा-** कर्तव्यः, हर्तव्यः, भवितव्यम्, हसितव्यम्, गन्तव्यम्, दातव्यम्, योक्तव्यम्, श्रोतव्यम्। यथा तव्यद्रूपं तथा तव्यस्यापि, स्वरे भेदः। **अनीयर् यथा-** देवदत्तेन करणीयो धर्मः, स्पृहणीयं रूपम्, **तव्यत्तव्यानीयरः** इति विहिताः, **कृत्याः प्राङ्ण्ण्वुलः** इति कृत्यसंज्ञा। **यत् यथा-** पेयम् उदकं देवदत्तेन। एवं प्राण्यम्, नेयम्, ज्ञेयम्, इत्यादि, **अचो यत्** इति यत्, पेयम् इत्यत्र **ईद्यति** इतीतीकारः। **क्यप् यथा-** स्तुत्यो देवः, शिष्यो बालः, **एति स्तुशास्वृदृजुषः क्यप्।** कृत्यः इत्यत्र **विभाषा कृवृषोः।** भृत्यः इत्यत्र **भृञोऽसंज्ञायाम्** । **ण्यत् यथा-** कार्यो धर्मः। एवं भेद्यम्, भोज्यम्, योग्यम्, इत्यादि, **ऋहलोर्ण्यत्।** **खल् यथा-** सुखेन क्रियते देवदत्तेन सुकरः, दःखेन क्रियते दुष्करः। एवं सुलभः, ईषत्करः, दुस्तरः, सुतरः, सुगमः, ईषद्बोधः, दुर्बोधः, सुबोधः, इत्यादि। **ईषद्दुस्सुषु कृच्छ्राकृच्छ्रर्थेषु खल्। कर्तृकर्मणोः कृती** ति कर्तरि षष्ठी प्राप्ता, **न लोकाव्ययनिष्ठाखलर्थतृनाम्** इति षष्ठीनिषेधः। **युच् यथा-** कृच्छ्रेण दीयते दुर्दानम्। एवं सुदानम्, सुपानम्, **आतो युच्।**

यदा भवेत्कर्मणि क्तस्तदा धातोः सकर्मकात्।

यदा तु भावे सर्वस्मात् सकर्माकर्मकात् तदा।

यदा सकर्मकेभ्यः स्यात् कर्मण्येव तदा भवेत्।

यदा त्वकर्मकेभ्यः स्यात् तदा भावे न कर्तरि।

यदा क्तो वर्तते भावे विभक्तिस्तु सकर्तृका।

तदोपादीयते भूतं देवदत्तस्य वासितम्।

यदा क्तः  कर्मणि तदा प्रथमैवास्य कर्मणि।

कर्तरि स्यात् तृतीयैव कंसः कृष्णेन निर्जितः।

सकर्मकात् कर्मणि स्युः कृत्या भावे त्वकर्मकात्।

तव्यत्तव्यानीयरो यत्क्यण्ण्यतः खल्तथैव च।

युजिति प्रत्यया अष्टौ कृत्संज्ञाः प्रकीर्तिताः।

भोक्तव्य ओदनो देवदत्तेनेति सकर्मकात्।

त्वया युवाभ्यां युष्माभिरेधितव्यमकर्मकात्।

करणीयं शुभं ज्ञेयं स्तुत्या कार्या हरिस्मृतिः।

सुखेन बुध्यत इति सुबोधो विदुषा हरिः।

कृच्छ्रेण दीयत इति दुर्दानमिति च क्रमात्।।

**त्रिषु गत्यर्थकादिभ्यस्तथा चैवादिकर्मणि।**

**अकर्मकात्समुत्पन्नो वर्तते कर्तृभावयोः।।**

यः क्तप्रत्ययः गत्यर्थादिभ्यो धातुभ्यो वर्तते, यश्च आदिकर्मणि विहितः, सः त्रिषु भावकर्मकर्तृषु वर्तते। के पुनर्गत्यर्थकादयः?

**गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च** इति निर्दिष्टा गत्यर्थकादयः। तेभ्य एव धातुभ्यः क्तो विहितस्त्रिष्वपि साधनेषु भवति।

यथा कर्मणि- गतो देवदत्तेन ग्रामः, कर्तरि- देवदत्तो ग्रामं गतः, भावे- देवदत्तेन गतम्।

धातवस्तु पुनरकर्मका अपि सोपसर्गाः सकर्मकाः भवन्ति। यथा कर्मणि- अनुशुष्कः सूर्येण ह्रदः, कर्तरि- ह्रदमनुशुष्कः सूर्यः, भावे- अनुशुष्कं ह्रदेन। अत्र **शुषः कः** इति कः। श्लिषिर्यथा- अश्लिष्टा कन्या अनेन, इति कर्मणि, कन्याम् आश्लिष्टः अयम्, इति कर्तरि, आश्लिष्टं भवता, इति भावे। शीङ् यथा- अतिशयितो गुरुः देवदत्तेन, इति कर्मणि, गुरुम् अतिशयितो देवदत्तः, इति कर्तरि, अतिशयितं देवदत्तेन इति भावे, **निष्ठा शीङ्----**इत्यकित्वात् गुणः। स्था यथा- उपस्थितो गुरुः शिष्येण, इति कर्मणि, उपस्थितो गुरुं शिष्यः, इति कर्तरि, उपस्थितं देवदत्तेन, इति भावे , **द्यतिस्यतिमास्था**मित्याकरस्येत्वम्। आस यथा-उपासितो गुरुरनेन, इति कर्मणि, उपासितोऽयं गुरुम्, इति कर्तरि, उपासितमनेन, इति भावे। वस् यथा- अध्युषितोऽनेन गुरुः, इति कर्मणि, अध्युषितो गुरुमयम्, इति कर्तरि, अध्युषितमनेन इति भावे, वचिस्वपीति संप्रसारणम्। जन यथा- उपजनितः पुत्रो यज्ञदत्तेन, इति कर्मणि, उपजनितः पुत्रं यज्ञदत्तः, इति कर्तरि, उपजनितं यज्ञदत्तेन, इति भावे। रुह यथा- आरूढो वानरो वृक्षम्, इति कर्तरि, वानरेणारूढो

वृक्षः इति कर्मणि, आरूढं वानरेण, इति भावे, **होढः** इति ढत्वम्, **झषस्तथोरि** ति धत्वम्, ष्टुत्वम्, **ढो ढे लोपः, ढ्रलोपे पूर्वस्य दीर्घोऽणः** इति दीर्घः। जीर्यतिर्यथा- अपजीर्णो देवदत्तश्चैत्रेण, इति कर्मणि, चैत्रमपजीर्णो मैत्रः, इति कर्तरि, अपजीर्णं चैत्रेण, इति भावे, **ऋत इत्** इति ऋकारस्येत्वम्, रपरत्वम्, **र्वोरुपधाया दीर्घ इकः**, रदाभ्यामिति तकारस्य नत्वम्।

आदिकर्मणि क्तः कर्मकर्तृभावेषु वर्तते। यथा- प्रभुक्त ओदनो देवदत्तेन, इति कर्मणि, प्रभुक्त ओदनं देवदत्तः, इति कर्तरि, प्रभुक्तमनेन, इति भावे। अकर्मकादिति- यदा क्तः अकर्मकेभ्यो धातुभ्यो वर्तते तदा कर्तृभावयोर्वर्तते। कर्तरि यथा- शरदि शुद्धा नदी, भावे- शुद्धं नद्या शरदि।

गत्यर्थकर्मकाश्चैव श्लिषिशीङ्स्थास्वसिर्जनः।
रुहिर्जीर्यतिरित्येते गत्यर्थाद्याः प्रकीर्तिताः।
एषां गत्यर्थकादीनां क्रमेणोदाहृतिर्यथा।
पुंसा गतं पुमान् ग्रामं गतः पुंसा गता पुरी।
अकर्मका धातवस्तु सोपसर्गाः सकर्मकाः।
अनुशुष्कं भास्करेण ह्यनुशुष्को रविर्ह्रदम्।
ह्रदोऽनुशुष्कः सूर्येण तथाश्लिष्टं वरेण च।
कन्यकाच्च वरः श्लिष्टः श्लिष्टा कन्या वरेण वा ।

आचार्येणातिशयितं शिष्योऽतिशयितो गुरुम्।
शिष्येणार्योऽतिशयितः पुत्रेणोपस्थितं तदा।
पुत्रस्तूपस्थितस्तातं पुत्रेणोपस्थितः पिता।
शिष्येणोपासितं शिष्यो गुरुश्चोपासितो गुरुः।
शिष्येणोपासितश्चाथ शिष्येणाध्युषितं तथा।
शिष्यो गुरुञ्चाध्युषितः  शिष्येणाध्युषितो गुरुः।
सुतेन चोपजीवितं पितोपजनितः सुतम्।
सुतः पित्रोपजनितस्तथारूढं वनौकसा।
आरूढः प्लवगो वृक्षमारूढः कपिना द्रुमः।
ओदनेनावजीर्णञ्चावजीर्णो ह्योदनञ्चयः।
तथौदनो जनेनावजीर्ण इत्याद्याहृतिः।
प्रभुक्तं देवदत्तेन प्रभुक्तश्चौदनं सुतः।
प्रभुक्त ओदनो विष्णुमित्रेणेत्यादिकर्मणि।
धातोरकर्मकादेव वर्तते कर्तृभावनयोः।
शुद्धा भागीरथी शुद्धं भागीरथ्येति च क्रमात्।।
**इष्णुच् क्तवतु विच् तृन् क्विप् क्मरच् षाकन् ल्युणिन्यचः।**
**उकाराणावुकञ्टक्टकादयः कर्तरि स्मृताः।।**

इष्णुजादयः प्रत्ययाः कर्तरि वर्तन्ते। कथम् ? **इष्णुच् यथा-** पुत्रमलङ्करिष्णुः, **अलंकञ्---**इत्यादिना इष्णुच्। **क्तवतुः यथा-** ग्रामं गतवान् देवदत्तः, **निष्ठा** इति क्तवतुप्रत्ययः, **न लोकाव्ययेत्यादिना** षष्ठी प्रतिषेधः। **विच् यथा-** उपयाः देवदत्तः, **विजुपे छन्दसी** ति विच्। **तृन् यथा-** कटं करोति कटं कर्ता देवदत्तः, **न लोकेति** षष्ठीप्रतिषेधः, **तृन्** इति तृन्। **आक्वेस्तच्छीसतद्धर्मतत्साधुकारिषु** इति तृन् तच्छीलाद्यर्थे। **क्विप् यथा-** काष्ठस्य भित् देवदत्तः, **सत्सूधिवषेति...**क्विप्। **क्मरच् यथा-** ओदनस्य घस्मरो देवदत्तः, **सृघस्यदः--**इति क्मरच्। **षाकन् यथा-**ओदनस्य भिक्षाकः, **जल्पभिक्षकुट्टलूण्टवृङ्‌ षाकन्** । **ल्युर्यथा-** पुत्रस्य नन्दनो देवदत्तः। **णिनिर्यथा-** शब्दस्य ग्राही देवदत्तः। **अच् यथा-** ओदनस्य पचः, **नन्दिग्रहिपचादिभ्योल्युणिन्यचः** इति त्रिभ्यो गणेभ्यः त्रयः प्रत्ययाः भवन्ति। **उकारो यथा-** कटं चिकीर्षुः, **सनाशंसभिक्ष उः, अतो लोपः। अण् यथा-**कुम्भकारः, **कर्मण्यण्, उपपदमतिङ्** इति समासः। **उकञ् यथा-** यागं गामुकः, **लषपतपद...**इत्युकञ्। **टक् यथा-** सीधु पिबतीति सीधुपः, सामगः, **गापोष्टक्। टः यथा-** गिरिचरः, **चरेष्टः। कः यथा-** पुत्रस्य प्रियो देवदत्तः, अभितः पर्णस्य क्षिपो वायुः, **इगुपधज्ञाप्रीकिरः कः।।**

अलङ्करिष्णुर्नगरीं प्रासादं गतवान् नृपः।

विच्छन्दसि कटं कर्ता देवदत्तो द्रुमस्य भित्।

अन्नस्य घस्मरश्चैत्रो भिक्षाकोऽन्नस्य माणवः।
पितुरानन्दनः कृष्णः शब्दस्य ग्राहिणी श्रुतिः।
ओदनस्य पचः सूदश्चिकीर्षुर्विजयं हरिः।
कुम्भं करोतीति कुम्भकारो ग्रामं च गामुकः।
सामगः काननचरः कुमारस्य प्रियः पिता।।
**भावे वोत्तरकाले ल्यप्तुमुन्त्त्वा पूर्वकालजाः।**
**कर्मणि प्रथमा तेषां द्वितीया तु विशेषतः।।**

**भावे इति।** ल्यप् ,तुमुन्, त्त्वा, इति प्रत्ययाः पूर्वकालिका उत्तरकालिकाश्च भावे एव वर्तन्ते, न कर्मकर्त्रोः। तेषां कर्मणि प्रथमा विधीयते। **ल्यप् तावत्**- कटः प्रकृत्य इष्यते देवदत्तेन, **समानकर्तृकयोः पूर्वकाले** इति प्राप्तस्य त्त्वाप्रत्ययस्य **समासेऽनञ्पूर्वो त्त्वो ल्यप्** , **ह्रस्वस्य पिति कृति तुक्** इति तुगागमः, उपपदमतिङ् इत्यधिकृत्य **कुगतिप्रादयः** इति समासः, **त्त्वातो सुन्कसुनः** इत्यव्ययसंज्ञा, **अव्ययादाप्सुपः** इति सुपो लूक्। **तुमुन् यथा**- ग्रामो गन्तुमिष्यते देवदत्तेन, **तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्** इति तुमुन्। **त्त्वा यथा**- कटः कृत्वा इष्यते नरेण। ल्यप्तुमुन्त्त्वाप्रत्ययानां प्रथमैव भवतीत्याह-द्वितीया तु विशेषतः-इति। कोऽर्थः? प्रथमामुपादाय विशेषतो द्वितीया भवतीति। **ल्यप् यथा**-ओदनं प्रपच्य गतः। **तुमुन् यथा**- ओदनं भोक्तुं गतः। **त्त्वा यथा**- पुत्रं दृष्ट्वा गच्छति पिता।।

धर्मः प्राप्य जयो गन्तुं श्रीर्लब्ध्वा च त्वयेष्यते।

धर्मं प्राप्य जयं गन्तुं श्रियं लब्ध्वा त्वमेष्यति।

प्रकृत्यर्थः पूर्वकालः प्रत्ययार्थोऽत्र तूत्तरः।।

शतृशानचौ कस्मिन् काले कतरस्मिन् कारके भवतः? वर्तमाने काले शतृशानचौ भवतः, शतृप्रत्ययः कर्तरि कारके वर्तते, शानच् कर्तरि कर्मणि भावे च इत्याह-

**वर्तमाने लटः स्थाने वर्तेते शतृशानचौ।**

**द्रव्यसत्तापरत्वाभ्यां समासो न तु सिध्यति।।**

वर्तमाने इति। कोऽर्थः? शतृशानचौ प्रत्ययौ वर्तमाने काले लट्स्थाने भवतः इति। **शतृ तावत्**-कटं कुर्वन् देवदत्तः ओदनं पचति। **शानच् यथा-** ओदनं पचमानो देवदत्तस्तुष्यति, इति कर्तरि, देवदत्तेन पच्यमानः शोभते ओदनः, इति कर्मणि, भावो भूयमानः, इति भावे। शतृशानचोः- **तौ सत्** इत्यनेन सत्संज्ञा विहिता इति तयोः सत्ता। द्रव्यसत्तापरत्वाभ्यां समासो न तु सिध्यति- इत्यस्य कोऽर्थः? द्रव्यस्य कर्मणः परयोः सत्संज्ञकयोः शतृशानचोर्योगे समासो न सिध्यतीति। सत्वं परत्वं च ययोः ताभ्यां द्रव्यस्य समासो न, यथा- कटं कुर्वन्, कटं कुर्वाणः।।

वर्तमाने लटः स्थाने वर्तेते शतृशानचौ।

प्रवर्तमानकाले तु शतृ स्यात्कर्तृकारके।

त्रिषु शानच् कर्तृकर्मभावार्थे स्यात्क्रमाद्यथा।

कटङ्कुर्वन्देवदत्त ओदनं पचति स्वयम्।

ओदनं पचमानस्तु यज्ञदत्तोऽपि तुष्यति।

चैत्रेणासौ पच्यमान ओदनश्शोभते तथा।

लोकोऽपि भूयमानोऽयं विष्णुमित्रेण शोभते।

द्रव्यसत्तापरत्वाभ्यां समासो न तु सिध्यति।

न हि द्रव्यस्य सत्वाच्च परत्वाच्च समर्थयोः।

समास उत्तरपदस्थितयोः शतृशानचोः।

कटं कुर्वन् देवदत्तः कटं कुर्वाण इत्यपि।।

।। इति कृत्प्रयोगसंग्रहः।।

**ग्रन्थनादाशयेनाहं श्लोकानां पञ्चविंशतेः।**

**परार्थभारमुद्वोढुं प्रभवेयं भवेभवे।।**

ग्रन्थनादिति। श्लोकानां पञ्चविंशतेः ग्रन्थनात् अहं परार्थभातम् आशयेन हृदयेन उद्वोढुं भवेभवे जन्मनिजन्मनि प्रभवेयम्-इत्यन्वयः।।

**।। इति वररुचिविरचितः प्रयोगसंग्रहः समाप्तः।।**